शुभकर्मोका आस्रव अर्थात् पुण्यबंधका हेतु शुभयोग ही है, यह स्वीकार कर लेने पर अशुभ योग और मिथ्यात्व आदि चार आस्रव, अशुभ कर्मके आस्रव—पापवन्धके हेतु हैं, यह अपने आप सिद्ध हो जाता है। इनमें मिथ्यात्व आदि आन्तरिक अशुभ व्यापारसे प्रतिक्षण पापकर्मका बंध होता है। मन, वचन, एवं शरीरका मिथ्यात्व आदि चारों आस्रवोंमें एवं हिंसा आदिमें प्रवर्तन होता है, वह बाह्य अशुभ व्यापार है। उससे पापकर्मका बंध प्रतिक्षण नहीं होता किन्तु जब अशुभ योग वरतता है, तभी पापकर्मका बंध होता है। मिथ्यात्व आस्रव पहले और तीसरे गुणस्थानमें होता है। अविरति आस्रव पांचवें गुणस्थान तक होता है। प्रमाद आस्रव छठे गुणस्थान तक होता है। कषाय आस्रव दसवें गुणस्थान तक होता है। योग आस्रव—अशुभ योग-

यत्र शुभयोगस्तत्र नियमेन निर्जरा ॥२६॥

शुभयोगः कर्मबन्धहेतुरिति न्यायादेव आस्रवभेदे किन्तु नियमतः अशुभकर्माणि त्रोटयतीति निर्जराकारणं तु समस्त्येव। उदयक्षयोपशमादिरूपताद्दृक्कारणद्वयपूर्वकत्वात् शुभयोगः नानाद्रव्यसंभूतकौपधेन जायमानशोषणपोषणवत् क्षयबन्धात्मककार्यद्वयसम्पादनार्हः। तथा चागमः—

वंदणएणं[1] भन्ते जीवे किं जणयइ गोयमा! वंदणएणं नीया गोयं कम्मं खवेइ, उच्चागोयं कम्मं निबंधइ" इत्यादि।

विस्तरेच्छुभिरत्र भिक्षुरचित 'नवपदार्थ चौपई' निरीक्षणीया। इति मोक्षबाधकतत्त्वनिरूपणम्।

इति श्रीतुलसीगणिसंकलितायां श्रीजैनसिद्धान्तदीपिकायां बन्धपुण्यपापास्रवस्वरूपनिर्णयो नाम चतुर्थः प्रकाशः।

१—उत्तराध्ययन अ० २९ गा० १०

आस्रव छठे गुणस्थान तक तथा शुभयोग आस्रव तेरहवें गुणस्थान तक होता है।

२६—जहाँ शुभयोग होता है, वहाँ निर्जरा अवश्य होती है।

शुभयोग शुभकर्मबन्धका हेतु है अतएव वह आस्रवके अन्तर्गत है किन्तु वह निश्चित रूपसे अशुभ कर्मोंको तोड़नेवाला है अतः निर्जराका कारण तो है ही। विविध गुणवाली वस्तुओंसे बनी हुई औषधिसे जिस प्रकार रोगका शोषण एवं शरीरका पोषण दोनों कार्य होते हैं, वैसे ही शुभयोग उदय एवं क्षयोपशम आदि कारणद्वय पूर्वक होता है अतः उससे कर्मका क्षय एवं बन्ध दोनों कार्य हो जाते हैं। जैसा शास्त्रोंमें कहा है—

"हे भगवन्! वन्दना करनेसे क्या लाभ होता है? गोतम! वन्दना करनेसे नीच-गोत्रका क्षय एवं उच्च-गोत्रका बन्ध होता है।"

इसका विस्तृत वर्णन देखनेके इच्छुक हों, वे श्री भिक्षुस्वामी रचित नवपदार्थका चौपई देखें। इस प्रकार मोक्षके बाधक तत्त्वोंका वर्णन समाप्त होता है।

इति श्री तुलसीगणि विरचित श्री जैनसिद्धान्त दीपिकाका बन्ध, पुण्य, पाप, आस्रवस्वरूपनिर्णय नामक चौथा प्रकाश समाप्त।

पञ्चमः प्रकाशः

आस्रवनिरोधः संवरः ॥ १ ॥

आस्रवस्य निरोधः कर्मागमद्वारसंवरणात् संवर उच्यते ।

सम्यक्त्वं विरतिरप्रमादोऽकषायोऽयोगश्च ॥ २ ॥

एते पञ्च संवराः सन्ति ।

यथार्थतत्त्वश्रद्धा—सम्यक्त्वम् ॥ ३ ॥

जीवादितत्त्वेषु यथार्था प्रतीतिः सम्यक्त्वम् ।

औपशमिकक्षायिकक्षायोपशमिकसास्वादनवेदकानि ॥ ४ ॥

अनन्तानुबन्धिचतुष्कस्य दर्शनमोहनीयत्रिकस्य[1] चोपशमे—औपशमिकम्, तत्क्षये—क्षायिकम्, तन्मिश्रे च क्षायोपशमिकम् । औपशमिकसम्यक्त्वात् पततः मिथ्यात्वं च गच्छतः—सास्वादनम्[2] । मिश्रात् क्षायिकं गच्छतः तदन्त्य-समये तत्प्रकृतिवेदनात्—वेदकम् ।

१—मिथ्यात्वमिश्रसम्यक्त्वमोहनीयानि ।

२—सह आ-ईषत् सम्यक्त्वरसास्वादनेनेति सास्वादनम् ।

पांचवां प्रकाश

१—आस्रवके निरोधको सम्वर कहते हैं।

२—सम्वर पांच हैं—सम्यक्त्व, विरति, अप्रमाद, अकषाय और अयोग।

३—यथार्थ तत्त्व—श्रद्धाको सम्यक्त्व कहते हैं।

४—सम्यक्त्व पांच प्रकारकी होती है—औपशमिक, क्षायिक, क्षायोपशमिक, सास्वादन और वेदक।

अनन्तानुबन्धी चतुष्क और दर्शन मोहनीय त्रिक—सम्यक्त्व मोहनीय, मिश्रमोहनीय एवं मिथ्यात्वमोहनीय इन सात प्रकृतियों के उपशान्त होनेसे प्राप्त होनेवाली सम्यक्त्वको औपशमिक तथा इनका क्षय होनेसे प्राप्त होनेवाली सम्यक्त्वको क्षायिक एवं इनका क्षयोपशम होनेसे प्राप्त होनेवाली सम्यक्त्वको क्षायोपशमिक कहते हैं। औपशमिक सम्यक्त्वसे गिरनेवाला जीव जब मिथ्यात्वको प्राप्त होता है, तब उसके उस अन्तराल कालमें जो सम्यक्त्व होता है, उसे सास्वादन कहते हैं। क्षायोपशमिक सम्यक्त्वसे

निसर्गजं निमित्तजञ्च ॥ ५ ॥

प्रत्येकं सम्यक्त्वं निसर्गजं निमित्तजञ्च भवति । तत्र गुरूपदेशादिनिरपेक्षं निसर्गजम् । तदपेक्षञ्च निमित्तजम् ।

द्वयञ्च करणापेक्षमपि ॥ ६ ॥

परिणामविशेषः करणम् ॥ ७ ॥

यथाप्रवृत्त्यपूर्वानिवृत्तिभेदात् त्रिधा ॥ ८ ॥

तत्रऽनाद्यनन्तसंसारपरिवर्त्ती प्राणी गिरिसरिद्ग्रावघोलनान्यायेन आयुर्वर्ज-सप्तकर्मस्थितौ[1] किंचिन्न्यूनैककोटीकोटिसागरोपममितायां जातायां येनाध्यवसायेन दुर्भेद्यरागद्वेषात्मकग्रन्थिसमीपं गच्छति, स यथाप्रवृत्तिकरणम् । एतद्धि-भव्यानामभव्यानां चानेकशो भवति । येनाप्राप्तपूर्वाध्यवसायेन ग्रन्थिभेदनाय उद्युङ्क्ते, सोऽपूर्वकरणम् । अपूर्वकरणेन भिन्ने ग्रन्थौ येनाध्यवसायेन उदीय-मानाया मिथ्यात्वस्थितेरन्तर्मुहूर्त्तमतिक्रम्य उपरितनीं चान्तर्मुहूर्त्तपरिमाणाम-वरुध्य तद्दलिकानां प्रदेशवेद्याभावः क्रियते सोऽनिवृत्तिकरणम् । तद्वेद्याभाव-श्चान्तरकरणम्[2] । तत् प्रथमे क्षणे आन्तर्मौहूर्त्तिकमौपशमिकसम्यक्त्वं भवति ।

१—पल्योपमासंख्येयभागन्यूनैककोटीकोटिसागरोपममितायाम् ।

२—उपशमसम्यक्त्वात् प्राग्वेद्योत्तरवेद्यमिथ्यात्वपुञ्जयोरन्तरकारित्वात् अन्तरकरणम् ।

क्षायिक सम्यक्त्वकी प्राप्ति होती है, उस समय क्षायोपशमिक सम्यक्त्वके अन्तिम समयको उसकी प्रकृतिका प्रदेशोदयके रूपमें अनुभव होता रहता है अतः उसे वेदक सम्यक्त्व कहते हैं।

५—प्रत्येक सम्यक्त्व दो-दो प्रकारकी होती है—निसर्गज और निमित्तज।

जो उपदेश आदिके निमित्त विना होती है, उसे निसर्गज सम्यक्त्व कहते हैं और जो उपदेश आदिके द्वारा होती है, उसे निमित्तज कहते हैं।

६—यह दोनों सम्यक्त्व करणसे भी प्राप्त होती हैं।

७—आत्माके परिणाम-विशेषको करण कहते हैं।

८—करण तीन प्रकारके हैं—यथाप्रवृत्ति, अपूर्व और अनिवृत्ति।

अनादि अनन्त संसारमें परिभ्रमण करनेवाले प्राणीके "गिरि सरित् ग्राव घोलणा"[1] न्यायके अनुसार आयुष्यवर्जित सात कर्मोंकी स्थिति कुछ कम एक कोड़ाकोड़ सागर परिमित होती है, तब वह जिस परिणामसे दुर्भेद्य रागद्वेषात्मक ग्रन्थिके पास पहुंचता है, उसको यथाप्रवृत्तिकरण कहते हैं। यह करण भव्य एवं अभव्य दोनोंके अनेक वार होना है। आत्मा जिस पूर्व—अप्राप्त परिणामसे उस रागद्वेषात्मक ग्रन्थिको तोड़नेकी चेष्टा करती है, उसको अपूर्वकरण कहते हैं। अपूर्वकरणके द्वारा ग्रन्थिका भेद होने पर जिस परिणामसे उदयमें आये हुए अन्तर्मुहूर्त-स्थितिवाले

१—पर्वत सरिताओंकी चट्टानें जलके आवर्तनसे घिसघिस कर चिकनी हो जाती है, 'इसको गिरिसरित् ग्रावघोलणा न्याय' कहते हैं।

कश्चित् पुनः अपूर्वकरणेन मिथ्यात्वस्य पुञ्जत्रयं[1] कृत्वा शुद्धपुञ्जपुद्गलान् वेदयन् प्रथमत एव क्षायोपशमिकं सम्यक्त्वं लभते। कश्चिच्च मिथ्यात्वं निर्मूलं क्षपयित्वा क्षायिकं प्राप्नोति।

सावद्यप्रवृत्तिप्रत्याख्यानं विरतिः ॥ ९ ॥

सावद्ययोगरूपायाः, अन्तर्लालसारूपायाश्च सावद्यवृत्तेः प्रत्याख्यानं विरतिः संवरः, अंशतः पञ्चमगुणस्थाने सर्वतश्च षष्ठगुणस्थानात् प्रभृति।

संयमोत्साहोऽप्रमादः ॥ १० ॥

अयं सप्तमगुणस्थानादारभ्य।

क्रोधाद्यभावोऽकषायः ॥ ११ ॥

१—शुद्धम्, अर्धशुद्धम्, अशुद्धं च क्रमशः सम्यक्त्वमोहनीयम्, मिश्रमोहनीयम्, मिथ्यात्वमोहनीयम् इति नामकं पुञ्जत्रयम्।

मिथ्यात्व दलिकों (पुद्गलों) को खपाकर एवं उसके बाद अन्त-र्मुहूर्त्त तक उदयमें आनेवाले मिथ्यात्व दलिकोंको दबाकर उन दलिकोंके अनुभवका निरोध किया जाता है अर्थात् उनका प्रदेशोदय भी नहीं रहता है—पूर्ण उपशम किया जाता है, उसको अनिवृत्तिकरण कहते हैं। और जो मिथ्यात्व दलिकोंके प्रदेश-वेदनका अभाव होता है—पूर्ण उपशम होता है; उसको अन्तर्करण कहते हैं। उस अन्तर्करणके पहले क्षणमें अन्तर्मुहूर्त्त स्थितिवाली औपशमिक सम्यक्त्व प्राप्त होती है और कोई जीव औपशमिक सम्यक्त्वको प्राप्त किये बिना ही अपूर्वकरणसे मिथ्यात्व दलिकोंके तीन पुञ्ज—शुद्ध, अर्धशुद्ध और अशुद्ध बनाकर शुद्ध पुञ्जके पुदगलोंका अनुभव करता हुआ क्षायोपशमिक सम्यक्त्वको प्राप्त कर लेता है। और कोई कोई मिथ्यात्वका समूल नाश कर क्षायिक सम्यक्त्वको भी प्राप्त कर लेता है।

९—सावद्य वृत्तिके प्रत्याख्यानको विरति कहते हैं।

पापकारी प्रवृत्ति और अन्तर्लालसा इन दोनोंको सावद्यवृत्ति कहते हैं। इनका त्याग करना विरति संवर है। वह पांचवें गुणस्थानमें अपूर्ण और छठेसे चौदहवें तक पूर्ण होता है।

१०—संयममें होनेवाले उत्साहको अप्रमाद संवर कहते हैं।

अप्रमाद संवर सातवें गुणस्थानसे चौदहवें तक होता है।

११—क्रोध आदिके अभावको अकषाय कहते हैं।

अकषाय संवर वीतराग-अवस्थामें ग्यारहवेंसे चौदहवें तक होता है।

असौ वीतरागावस्थायामेकादशगुणस्थानमारभ्य।

अप्रकम्पोऽयोगः ॥ १२ ॥

असौ शैलेश्यवस्थायां चतुर्दशगुणस्थाने। यच्च संयमिनां ध्यानादिना शुभयोगावरोधः, सोऽपि अयोगसंवरांश एव। अप्रमादादयः त्रयोऽपि प्रत्याख्यानानपेक्षा, आन्तरवैशद्यसाध्यत्वात्।

तपसा कर्मविच्छेदादात्मनैर्मल्यं निर्जरा ॥ १३ ॥

सकामाऽकाम च ॥ १४ ॥

सह कामेन मोक्षाभिलापेण विधीयमाना निर्जरा—सकामा, तदपरा अकामा। द्विधापि इयं सम्यक्त्विनां मिथ्यात्विनां च।

उपचारात्तपोऽपि ॥ १५ ॥

कारणे कार्योपचारात्तपोऽपि निर्जराशब्दवाच्यं भवति, तत् एव द्वादशविधाऽसौ।

अनशनोनोदरिकावृत्तिसंक्षेपरसपरित्यागकायक्लेशप्रतिसंलीनता बाह्यम् ॥ १६ ॥

एतेषामशनादि बाह्यद्रव्यनिमित्तकत्वात्, परप्रत्यक्षविषयत्वाच्च बाह्यतपस्त्वम्।

१२—अप्रकम्प (पूर्ण अडोल) अवस्थाको अयोग कहते हैं।

अयोग संवर शैलेशी-अवस्था (शैल+ईश:)=शैलेश—मेरु, उसकी तरह अडोल अवस्था) में—चौदहवें गुणस्थानमें होता है। संयमी साधुओंके ध्यान आदिके द्वारा जो शुभयोगका निरोध होता है, वह भी अयोग सम्वरका ही अंश है। अप्रमाद, अकषाय और अयोग सम्वर तीनों प्रत्याख्यान किये बिना ही आन्तरिक आत्म-उज्ज्वलता से ही होते हैं।

१३—तपस्याके द्वारा कर्ममलका विच्छेद होनेसे जो आत्म-उज्ज्वलता होती है, उसे निर्जरा कहते हैं।

१४—निर्जरा दो प्रकारकी होती है—सकाम और अकाम।

मोक्ष प्राप्तिके उद्देश्यसे की जानेवाली निर्जरा सकाम और इसके अतिरिक्त निर्जरा अकाम होती है। यह दोनों प्रकारकी निर्जरा सम्यक्त्वी एवं मिथ्यात्वी दोनोंके ही होती है।

१५—उपचारसे तपस्याको भी निर्जरा कहते हैं।

कारणको कार्य मानकर तपस्याको भी निर्जरा कहते हैं—अतएव वह (निर्जरा) बारह प्रकारकी होती है।

१६—अनशन, ऊनोदरिका, वृत्तिसंक्षेप, रसपरित्याग, कायक्लेश और प्रतिसंलीनता यह छः बाह्य तपस्याके भेद हैं।

यह अन्न आदि बाह्य वस्तुओंसे सम्बन्धित होते हैं और दूसरोंके द्वारा प्रत्यक्ष देखे जाते हैं अतः यह बाह्य तप कहलाते हैं।

आहारपरिहारोऽनशनम् ॥ १७ ॥

अन्नपानखाद्यस्वाद्यरूपचतुर्विधस्याहारस्य परित्यागोऽनशनम्। तच्च इत्वरिकम्—उपवासादारभ्य आषण्मासम्, यावत्कथिकम्—आमरणम्।

अल्पत्वमूनोदरिका ॥ १८ ॥

अल्पत्वञ्च—अन्नपानवस्त्रपात्रकषायादीनाम्। उपवासात् प्राग् नमस्कार-सहितादीनामत्रान्तर्भावः।

नानाभिग्रहाद् वृत्त्यवरोधो वृत्तिसंक्षेपः ॥ १९ ॥

भिक्षाचरिकेति नामान्तरमस्य।

विकृतेर्वर्जनं रसपरित्यागः ॥ २० ॥

विकृतिः—घृतदुग्धदध्यादिः।

हिंसाद्यभावे कष्टसहनं कायक्लेशः ॥२१॥

इन्द्रिययोगकषायनिग्रहो विविक्तशय्यासनं च प्रतिसंलीनता[1] ॥२२॥

अकुशलव्यापारान्निवृत्तिः कुशलप्रवृत्तिश्च निग्रहः। विविक्तशय्यासनम्—एकान्तवासः।

१—गुप्तता

१७—आहारके त्याग करनेको अनशन कहते हैं।

आहार चार प्रकारका होता है—अन्न, पानी, खाद्य (मेंवा आदि) और स्वाद्य (लवंग आदि), इनको त्यागनेका नाम अनशन है। वह दो प्रकारका होता है—इत्वरिक और यावत्कथिक। उपवाससे लेकर छः मास तककी तपस्याको इत्वरिक और आमरण तपस्याको यावत्कथिक कहते हैं।

१८—आहार, पानी, वस्त्र, पात्र एवं कषाय आदिकी अल्पता करनेको ऊनोदरिका कहते हैं।

उपवाससे पहले नमस्कारसहिता (नवकारसी) आदि जितनी तपस्या होती है, वह सब ऊनोदरिकाके अन्तर्गत होती है।

१९—विविध प्रकारके अभिग्रहों (प्रतिज्ञाओं) से जिस वृत्ति—चर्या का अवरोध किया जाता है, उसे वृत्ति-संक्षेप (भिक्षाचरिका) कहते हैं।

२०—घृत आदि विकृतियों (विगयों) का त्याग करनेको रसपरित्याग कहते हैं।

२१—हिंसा आदि रहित कष्ट सहन करनेको कायक्लेश कहते हैं।

२२—इन्द्रियनिग्रह, योगनिग्रह, कषायनिग्रह और विविक्त शय्यासन, इनको प्रतिसंलीनता कहते हैं।

अकुशल चेष्टाओंसे निवृत्ति एवं कुशल चेष्टाओंमें प्रवृत्ति करनेको निग्रह कहते हैं। एकान्तवास—स्त्री-पशु-क्लीब आदि कामोद्दीपक सामग्री रहित स्थानमें रहनेको विविक्तशय्यासन कहते हैं।

प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायध्यानव्युत्सर्गा आभ्यन्तरम् ॥२३॥

एते षट् मोक्षसाधने अन्तरंगत्वादाभ्यन्तरं तपः।

अतिचारविशुद्धयेऽनुष्ठानं प्रायश्चित्तम् ॥२४॥

आलोचनप्रतिक्रमणतदुभयविवेक[1]व्युत्सर्ग[2]तपश्छेदमूलाऽनवस्थाप्यपाराञ्चित[3]भेदाद् दशप्रकारम्।

[4]अनाशातनाबहुमानकरणं विनयः ॥२५॥

१—आगतस्याऽशुद्धाहारादेः परिष्ठापनम्। २—कायोत्सर्गः। ३—अवहेलनापूर्वकं व्रतारोपणम्। ४—असद्व्यवहारः आशातना, तद्वर्जनमनाशातना।

२३—प्रायश्चित्त, विनय, वैयावृत्त्य, स्वाध्याय, ध्यान और व्युत्सर्ग यह छः आभ्यन्तर तपस्याके भेद हैं।

यह मोक्षसाधनाके अन्तरंग कारण हैं अतः इनको आभ्यन्तर तप कहते हैं।

२४—अतिचार—दोषकी विशुद्धिके लिये जो क्रिया—अनुष्ठान किया जाता है, उसे प्रायश्चित्त कहते हैं।

प्रायश्चित्त दस प्रकारका होता है—आलोचन—गुरुके समक्ष अपने दोषोंका निवेदन करना, प्रतिक्रमण—किये हुए पापोंसे निवृत्त होनेके लिए 'मिथ्या मे दुष्कृतम्' मेरे सब पाप निष्फल हों—ऐसा कहना तथा कायोत्सर्ग आदि करना और आगामी पापकार्योंसे दूर रहनेके लिए सावधान रहना, तदुभय—आलोचन एवं प्रतिक्रमण दोनों करना, विवेक—आये हुए अशुद्ध आहार आदिका उत्सर्ग करना, व्युत्सर्ग—चतुर्विंशति-स्तुतिके साथ कायोत्सर्ग करना, तप—उपवासादि करना, छेद—संयम कालको छेद कर कम कर देना, मूल—पुनः व्रतारोपण करवाना—नई दीक्षा देना, अनवस्थाप्य—तपस्यापूर्वक नई दीक्षा देना और पाराञ्चित—भर्त्सना एवं अवहेलनापूर्वक नई दीक्षा देना, यह पराकाष्ठाका प्रायश्चित्त है।

२५—आशातना न करने एवं बहुमान करनेको विनय कहते हैं।

विनय सात प्रकारका होता है—ज्ञानविनय, दर्शनविनय, चारित्रविनय, मनविनय, वचनविनय, कायविनय और उपचार-विनय—गुरु आदि बड़ोंके आने पर खड़ा होना, आसन देना।

ज्ञान-दर्शनचारित्रमनो[1]वचनकायो[2]पचारभेदात् सप्तधा।

सेवाद्यनुष्ठानं वैयावृत्त्यम् ॥२६॥

तच्च आचार्योपाध्यायस्थविरतपस्विग्लानशैक्षकुलगणसंघसाधर्मिकभेदाद् दशविधम्।

कालादिमर्यादयाऽध्ययनं स्वाध्यायः ॥२७॥

स च वाचनाप्रच्छनापरिवर्तनाऽनुप्रेक्षाधर्मोपदेशभेदात् पञ्चविधः।

एकाग्रचिन्ता, योगनिरोधो वा ध्यानम् ॥२८॥

एकाग्रचिन्तनं छद्मस्थानाम्, केवलिनां तु योगनिरोध एव, एकाग्रचिन्तनस्य तत्राऽनावश्यकत्वात्। एतच्चान्तर्मुहूर्त्तावधिकम्।

आर्त्तरौद्रधर्मशुक्लानि ॥२९॥

प्रियाप्रियवियोगसंयोगे चिन्तनमार्त्तम् ॥३०॥

प्रियाणां शब्दादिविषयाणां वियोगे सति तत्संयोगाय, अप्रियाणां च संयोगे, तद्वियोगाय यदेकाग्रचिन्तनम्, तद् आर्त्तध्यानमुच्यते।

१—मनोवाक्कायनम्रता। २—अभ्युत्थानमासनप्रदानादिकम्।

२६—सेवा आदि करनेको वैयावृत्त्य कहते हैं।

वैयावृत्यके दस स्थान होते हैं—आचार्य, उपाध्याय, स्थविर (वृद्ध साधु), तपस्वी, ग्लान—रोगी, शैक्ष (नव-दीक्षित), कुल, गण, संघ—साधुओंके समूहविशेष, सार्धमिक।

२७—उचित समय एवं परिस्थितियोंमें अध्ययन करनेको स्वाध्याय कहते हैं।

स्वाध्याय पांच प्रकारका होता है—वाचना, प्रच्छना—पूछना, परिवर्तना—कंठस्थकी हुई चीजोंकी पुनरावृत्ति करना, अनुप्रेक्षा—अर्थचिन्तन करना और धर्म-कथा करना।

२८—एकाग्रचिन्तन एवं योग—मनोवाक्कायके निरोधको ध्यान कहते हैं।

एकाग्रचिन्तन ध्यान छद्मस्थों—असर्वज्ञोंके होता है और योग-निरोधात्मक ध्यान केवलज्ञानियोंके होता है क्योंकि उन्हें एकाग्रचिन्तनकी आवश्यकता नहीं होती। ध्यानका कालमान अन्तर्मुहूर्त्तका होता है।

२९—ध्यान चार प्रकारका होता है—आर्त्त, रौद्र, धर्म और शुक्ल।

३०—प्रियके वियोग एवं अप्रियके संयोगमें चिन्तित रहनेको आर्त्त ध्यान कहते हैं।

प्रिय शब्द आदि विषयोंका वियोग होनेपर उनके संयोगके लिए और अप्रिय शब्द आदि विषयोंका संयोग होनेपर उनके वियोगके

वेदनायां व्याकुलत्वं निदान च ॥३१॥

रोगादीनां प्रादुर्भावे व्याकुलत्वम्, वैषयिकसुखाय दृढसंकल्पकरणमपि आर्त्तध्यानम्।

हिंसाऽनृतस्तेयविषयसंरक्षणार्थं रौद्रम् ॥३२॥

यच्चिन्तनमिति गम्यम्। एते षष्ठगुणस्थानं यावद् भवतः।

आज्ञाऽपायविपाकसंस्थानविचयाय धर्मम् ॥३३

आज्ञा—अर्हन्निदेशः। अपायः—दोषः। विपाकः—कर्मफलम्। संस्थानम्—लोकाकृतिः। एषां विचयाय—निर्णयाय चिन्तनं धर्मध्यानम्। एतच्च आद्वादशगुणस्थानात्।

पृथक्त्ववितर्कसविचारैकत्ववितर्काऽविचारसूक्ष्मक्रियाऽप्रतिपातिसमुच्छिन्नक्रियाऽनिवृत्तीनि शुक्लम् ॥३४॥

निर्मलं प्रणिधानं शुक्लम्। तच्चतुर्विधम्; तत्र प्रथमं भेदप्रधानं सविचारम्, द्वितीयमभेदप्रधानमविचारम्। तृतीयं सूक्ष्मकायिकक्रियमप्रतिपाति, चतुर्थञ्च अयोगावस्थमनिवृत्ति। आद्यद्वयं सप्तमगुणस्थानाद् द्वादशान्तं भवति। शेषद्वयं च केवलिनो योगनिरोधावसरे।

लिए जो आतुरता होती है—एकाग्रचिन्ता होती है, वह आर्त्त-ध्यान है।

३१—वेदनामें—रोगादि कष्टोंमें व्याकुल होना एवं निदान-वैषयिक सुख प्राप्तिके लिए दृढ़ संकल्प करना भी आर्त्त ध्यान है।

३२—हिंसा, असत्य, चोरी एवं विषयभोगोंकी रक्षाके निमित्त की जानेवाली एकाग्रचिन्ता रौद्रध्यान है।

आर्त और रौद्र यह दोनों ध्यान छठे गुणस्थान तक होते हैं।

३३—आज्ञा, अपाय, विपाक, एवं संस्थानका निर्णय करनेके लिए जो चिन्तन किया जाता है, वह धर्म-ध्यान कहा जाता है।

आज्ञा—अरिहन्त-उपदेश, अपाय—रागद्वेष आदि दोष, विपाक—कर्मफल और संस्थान—लोकका आकार, इनके स्वरूपका चिन्तन करना धर्म-ध्यान है और वह बारहवें गुणस्थान तक होता है।

३४—शुक्ल ध्यानके चार भेद हैं—पृथक्त्व—वितर्क-सविचार, एकत्व—वितर्क-अविचार, सूक्ष्मक्रियाप्रतिपाति, समुच्छिन्न-क्रियाऽनिवृत्ति।

निर्मलप्रणिधान—समाधि-अवस्थाको शुक्ल ध्यान कहते हैं। वह चार प्रकारका है—किसी एक वस्तुको अपने ध्यानका विषय बनाकर दूसरे सब पदार्थोंसे उसके भिन्नत्वका चिन्तन करना

वितर्कः श्रुतम् ॥३५॥

श्रुतज्ञानालम्बनं चिन्तनं श्रुतम्, तदेव वितर्कः।

विचारोऽर्थव्यञ्जनयोगसंक्रान्तिः ॥३६॥

अर्थादर्थान्तरे, शब्दात् शब्दान्तरे, अर्थात् शब्दान्तरे, शब्दादर्थान्तरे च, योगाद् योगान्तरे वा संक्रमणम् विचारः।

धर्मशुक्ले तपः ॥३७॥

एतेषु च धर्मशुक्लध्याने एव मोक्षहेतुत्वात् तपोभेदेषु भावनीये।

शरीरकषायादेः परित्यागो व्युत्सर्गः ॥३८॥

तत्र शरीरगणोपधिभक्तपानभेदाच्चतुर्विधो द्रव्यव्युत्सर्गः, कषायसंसारकर्मभेदात् त्रिविधोभावव्युत्सर्गः।

पृथक्त्व-वितर्क है और उसमें परिवर्तन[1] होता है इसलिए वह सविचार है। इसके विपरीत एकत्वका चिन्तन करनेवाला ध्यान एकत्ववितर्क है और इसमें परिवर्तन नहीं होता इसलिए वह अविचार है। तेरहवें गुणस्थानके अन्तमें जब शरीरकी सूक्ष्मक्रिया बाकी रहती है, वह अवस्था सूक्ष्मक्रिय है और उसका पतन नहीं होता अतः वह अप्रतिपाति है। अयोगावस्था—चतुर्दशगुणस्थानकी अवस्थाको समुच्छिन्नक्रिय कहते हैं और उसकी निवृत्ति नहीं होती इसलिए वह अनिवृत्ति है। पहले दो सातवें गुणस्थानसे बारहवें गुणस्थान तक होते हैं और शेष दो केवलज्ञानीके योग-निरोधके समय होते हैं।

३५—श्रुतज्ञानके सहारे किये जानेवाले चिन्तनको श्रुत कहते हैं और उसीका नाम वितर्क है।

३६—वस्तु, शब्द एवं योगके परिवर्तनको विचार (विचरण) कहते हैं।

एक अर्थसे दूसरे अर्थ पर, एक शब्दसे दूसरे शब्द पर, अर्थसे शब्द पर, शब्दसे अर्थ पर एवं एक योगसे दूसरे योग पर परिवर्तन किया जाता है, वह विचार है।

३७—धर्म और शुक्ल ये दो ध्यान तप हैं।

३८—शरीर एवं कषाय आदिका उत्सर्ग करनेको व्युत्सर्ग कहते हैं।

---

१ विचार; इसका स्पष्टीकरण ३६ वें सूत्रमें है।

कृत्स्नकर्मक्षयादात्मनः स्वरूपावस्थानं मोक्षः ॥३९॥

कृत्स्नकर्मणामपुनर्बन्धतया क्षयात्, आत्मनो ज्ञानदर्शनमये स्वरूपेऽवस्थानं मोक्षः। अनादिसंश्लिष्टानामपि आत्मकर्मणां पार्थक्यं न संदेग्धव्यम्। दृश्यन्तेऽनादिसंबद्धा धातुमृदादयः पृथक् संभूयमानाः।

अपुनरावृत्तयोऽनन्ता मुक्ताः ॥४०॥

सिद्धो, बुद्धो, मुक्तः, परमात्मा, परमेश्वर, ईश्वर इत्यादय एकार्थाः। न पुनरावृत्तिर्भवभ्रमणं येषां तेऽनन्तसंख्याका मुक्ताः सन्ति। संसारिणां सर्वदा तेभ्योऽनन्तानन्तगुणत्वात् न जीवशून्यसंसारस्यापत्तिः।

तीर्थातीर्थतीर्थङ्करातीर्थङ्करस्वान्य[1]गृहस्त्रीपुंनपुंसकलिङ्ग-प्रत्येकबुद्धस्वयंबुद्धबोधितैकानेकभेदात् पञ्चदशधा ॥४१॥

मुक्त्यनन्तरमेकसमयाद् ऊर्ध्वं गच्छन्त्यालोकान्तात् ॥४२॥

मुक्त्यनन्तरमेव मुक्तात्मानोऽविग्रहगत्या एकसमयेन उपरि गच्छन्ति

१—स्वादिभ्यः षड्भ्यः लिङ्गशब्दो योज्यः।

शरीर, गण, उपधि, (वस्त्र, पात्र), भक्त-पान, इनको छोड़ना द्रव्य-उत्सर्ग है और कषाय, संसार एवं कर्मसे छुटकारा पाना भाव उत्सर्ग है।

३९—समस्त कर्मोंका फिर बन्ध न हो, ऐसा क्षय होनेसे आत्मा अपने ज्ञान-दर्शनमय स्वरूपमें अवस्थित होती है, उसका नाम मोक्ष है।

अनादिकालसे सम्बन्धित आत्मा और कर्म पृथक् कैसे हो सकते हैं; ऐसा सन्देह नहीं करना चाहिए; जबकि अनादिसम्बद्ध धातु एवं मिट्टी, अग्नि आदि उचित साधनोंके द्वारा पृथक् होते हुए देखे जाते हैं।

४०—कर्ममुक्त आत्मायें अनन्त हैं और उनका पुनर्जन्म नहीं होता है।

सिद्ध, बुद्ध, मुक्त, परमात्मा, परमेश्वर, ईश्वर, यह सब एकार्थवाची शब्द हैं। सांसारिक जीव मुक्त आत्माओंसे अनन्त गुण अनन्त अधिक हैं अतः यह प्रश्न उपस्थित ही नहीं होता कि यह संसार कभी जीवोंसे खाली हो जायगा।

४१—मुक्त जीव १५ प्रकारके होते हैं—तीर्थसिद्ध, अतीर्थसिद्ध, तीर्थङ्कर, अतीर्थङ्कर, स्वलिङ्ग, अन्यलिङ्ग, गृहलिङ्ग, स्त्रीलिङ्ग, पुरुषलिङ्ग, नपुंसकलिङ्ग, (कृत्रिमनपुंसक), प्रत्येकबुद्ध, स्वयं-बुद्ध, बुद्धबोधित, एकसिद्ध और अनेकसिद्ध।

४२—आत्मायें कर्ममुक्त होते ही प्रथम एक क्षणमें (अविग्रह गतिसे) लोकान्त तक ऊंची चली जाती है।

जैसे कहा भी है—औदारिक, तैजस और कार्मण यह तीन

लोकान्तपर्यन्तम्, धर्मास्तिकायाभावाद् नालोके।

तथा च—

"औदारिकतैजसकार्मणानि संसारमूलकारणानि।
हित्वेह ऋजुश्रेण्या समयेनैकेन यान्ति लोकान्तम्॥
नोर्ध्वमुपग्रहविरहादधोऽपि वा गौरवाभावात्।
योगप्रयोगविगमाद् न तिर्यगपि तस्य गतिरस्ति॥
लाघवयोगाद् धूमवद् अलाबुफलवच्च सङ्गविरहेण।
बन्धनविरहादेरण्डवच्च सिद्धस्यगतिरूर्ध्वम्॥
सादिकमनन्तमनुपममव्याबाधं स्वभावजं सौख्यम्।
प्राप्तः स केवलज्ञान-दर्शनो मोदते मुक्तः॥

ईषत् प्राग्भारा पृथ्वी तन्निवासः॥४३॥

सा च समयक्षेत्रसमायामा, मध्येऽष्टयोजनबाहुल्या, पर्यन्ते मक्षिकापत्रतोऽप्यतितन्वी, [1]लोकाग्रभागसंस्थिता, समच्छत्राकृतिरर्जुन[2]स्वर्णमयी। मुक्तिसिद्धालयादयोऽस्याः पर्यायाः।

तत्त्वद्वय्यां नवतत्त्वावतारः॥४४॥

वस्तुतो जीवाजीवरूपा तत्त्वद्वयी विद्यते, पुण्यादीनां च तदवस्थाविशेषरूपत्वात् तत्रैवान्तर्भावः। क्वचिदात्मना सम्बध्यमानाः, अवरुद्ध्यमानाः, निर्जीर्यमाणाश्च पुद्गलाः क्रमेण द्रव्यास्रवसंवरनिर्जरा इति गीयन्ते।

१—इयं च सर्वार्थसिद्धविमानाद् द्वादशयोजनपरतः, लोकाच्च एकयोजनावरतः। इदं च एकयोजनोत्सेधांगुलमेयम्।

२—श्वेतस्वर्णमयी

शरीर संसारके मूल कारण हैं। मुक्त जीव उनको छोड़कर ऋजु-श्रेणीसे एक ही समयमें लोकान्त तक चले जाते हैं। धर्मास्तिकायकी सहायता प्राप्त न होनेके कारण उससे ऊपर नहीं जाते और वे हल्के होते हैं अतः फिर वापिस नीचे भी नहीं आते तथा योगरहित होनेके कारण तिरछी गति भी नहीं करते हैं। धूएंकी तरह हल्के और तूंबेकी तरह निर्लेप एवं मुच्यमान एरण्ड फलीकी तरह बन्धन-मुक्त होनेके कारण उनकी ऊर्ध्वगति होती है और वहां वे सादि, अनन्त, अनुपम एवं बाधारहित स्वाभाविक सुखको पाकर केवल-ज्ञान, केवल दर्शनसे सहज आनन्दका अनुभव करते हैं।

४३—मुक्तात्माओंके निवास-स्थानको ईषत् प्राग्भारा पृथ्वी कहते हैं।

वह पृथ्वी समयक्षेत्रके बराबर लम्बी-चौड़ी है। उसके मध्य-भागकी मोटाई आठ योजनकी है और उसका अन्तिम भाग मक्खीके परसे भी अधिक पतला है और वह लोकके अग्रभागमें स्थित है। उसका आकार सीधे छत्ते जैसा है तथा वह श्वेत स्वर्ण-मयी है। मुक्ति, सिद्धालय ये उसके नाम हैं।

४४—दो तत्त्वोंमें नव तत्त्वोंका समावेश हो जाता है।

वस्तुवृत्त्या जीव और अजीव ये दो ही तत्त्व हैं। पुण्य आदि तो इन्हींकी अवस्था विशेष हैं। जैसे—जीव, आस्रव, सम्वर, निर्जरा एवं मोक्ष, ये पांच जीव हैं और अजीव—पुण्य, पाप और बंध ये चार अजीव हैं। कहीं-कहीं आत्माके द्वारा बंधनेवाले, रोके जानेवाले, तथा अलग किये जानेवाले पुद्गलोंको क्रमशः द्रव्य आश्रव, द्रव्य संवर, और द्रव्य निर्जरा कहते हैं।

अरूपिणो जीवाः ॥४५॥

अजीवा रूपिणोऽपि ॥४६॥

अजीवा धर्माधर्माकाशकाला अरूपिणः। पुद्गलास्तु रूपिण एव, तत्पर्याय-भूताः पुण्यपापबन्धा अपि रूपिणः। नवापि पदार्था ज्ञेयाः, संवरनिर्जरा-मोक्षास्त्रय उपादेयाः शेषाश्च षड् हेयाः। जीवस्यापि संसारावस्थापेक्षया हेयत्वमविरुद्धम्। अथ नवतत्त्वपरमार्थविदको भिक्षुर्दर्शितस्तटाक दृष्टान्तो निदर्श्यंते। तथाहि—

जीवस्तटाकरूपः, अतटाकरूपोऽजीवः, बहिर्निर्गच्छज्जलरूपे पुण्यपापे, विशदाविशदजलागमनमार्गरूप आस्रवः, जलागमनमार्गनिरोधरूपः संवरः, जलनिष्कासनोपायरूपा निर्जरा, तटाकस्थितजलरूपो बन्धः, नीरविनिर्मुक्त-तटाक इव मोक्षः।

इति मोक्षसाधकतत्साध्यतत्त्वनिरूपणम्।

इतिश्री तुलसीगणिसंकलितायां श्रीजैनसिद्धान्तदीपिकायां संवरनिर्जरामोक्षस्वरूपनिर्णयो नाम पञ्चमः प्रकाशः।

४५—जीव अरूपी—अमूर्त होते हैं।

४६—अजीव रूपी भी होते हैं।

अजीवके चार भेद हैं—धर्म, अधर्म, आकाश और काल ये अरूपी होते हैं और पुद्गल रूपी होते हैं तथा पुद्गलके अवस्था-विशेष पुण्य, पाप और बन्ध भी रूपी हैं। नव तत्त्वोंमें जानने योग्य सब हैं। सम्वर, निर्जरा एवं मोक्ष ये तीन ग्रहण करने योग्य हैं और शेष सब छोड़ने योग्य हैं। जीवको भी सांसारिक अवस्थाकी अपेक्षासे छोड़ने योग्य कहा गया है। इन सब तत्त्वोंका स्वरूप समझानेके लिए श्री भिक्षुस्वामीने जो तालाबका उदाहरण बतलाया है, वह इस प्रकार है। जैसे—जीव तालाबके समान है। अजीव अतालाबके समान है। बाहर निकलते हुए पानीकी तरह पुण्य पाप हैं। निर्मल और मलिन जलागमन मार्गके समान आस्रव हैं। जलागमन मार्गको रोकनेके समान सम्वर है। जल निकालनेकी मोरीके समान निर्जरा है। तालाब स्थित जलके समान बंध है।

इस प्रकार मोक्षके साधक तत्त्वोंका वर्णन समाप्त होता है।

इति श्री तुलसीगणि विरचित श्री जैनसिद्धान्त दीपिकाका संवर-निर्जरामोक्षस्वरूपनिर्णय नामक पांचवां प्रकाश समाप्त।

षष्ठः प्रकाशः

सर्वभूतेषु संयमः—अहिंसा ॥ १ ॥

असत्प्रवृत्तिनिरोधः अनुद्वेजनं वा संयमः, मैत्रीति यावत् ।

पापाचरणादात्मरक्षा दया ॥ २ ॥

पापहेतुकमाचरणम्—प्राणातिपातादि, आर्त्तध्यानादि वा पापाचरणम्, तस्मात् स्वस्य परस्य वा आत्मनो रक्षणम्—ततो निवर्तनं दयाऽभिधीयते । यत्र अहिंसा तत्रैव दया, यत्र नाहिंसा न च तत्र दया, इत्यन्वयव्यतिरेकाद् द्वयोर्नित्य-संबन्धित्वेऽपि लौकिकदयातः पार्थक्यप्रकाशनार्थमेव अस्याः पृथक् व्याख्यानम् ।

सदुपदेशविपाकचिन्तनप्रत्याख्यानादयोऽस्या उपायाः ॥ ३ ॥

लोके प्राणरक्षापि ॥ ४ ॥

शरीरेण सह प्राणानां यः संयोगस्तस्य देशतः सर्वतो वा रक्षणमपि लोके दया प्रोच्यते । संयमानुकूला प्राणरक्षा तु अहिंसापरिप्लुतत्वात् परमार्थतोऽपि दयैवेति नात्र तद्ग्रहणम् ।

छठा प्रकाश

१—प्राणीमात्रके प्रति संयम—अपनी असत्प्रवृत्तियोंकी रुकावट रखना, उनको कष्ट न पहुंचाना तथा उनके प्रति मैत्री रखना अहिंसा है।

२—पापमय आचरणोंसे अपनी या दूसरेकी आत्माको बचाना दया है।

जहां अहिंसा होती है, वहीं दया होती है और जहां अहिंसा नहीं होती, वहां दया भी नहीं होती। इस अन्वय व्यतिरेकात्मक सम्बन्धसे दया और अहिंसा दोनों नित्यसम्बन्धी—एकसाथ रहनेवाले तत्त्व हैं तो भी इस दयाको लौकिक दयासे पृथक् करनेके लिए अहिंसा और दयाकी व्याख्या पृथक् २ की गई है।

३—सत् उपदेश, कर्मफलचिन्तन, प्रत्याख्यान—त्याग आदि आदि दयाके उपाय हैं।

४—लोकव्यवहारमें प्राणरक्षाको भी दया कहते हैं।

शरीरके साथ प्राणोंका जो सम्बन्ध होता है, वही जीवन है, उसकी आंशिकरूपसे या पूर्णरूपसे रक्षा करना भी लोकव्यवहारमें दया मानी जाती है। संयमी पुरुषोंको संयमानुकूल प्राणरक्षा

मोहमिश्रितत्वान्नात्मसाधनी ॥ ५ ॥

अनन्तरोक्ता दया मोहमिश्रितत्वात् आत्मसाधनार्थं नालम् । आत्मशुद्ध्यर्थं दयामधिकुर्मः; नेयं तत् कार्यक्षमेति वस्तुवृत्त्या न दया । न च दया वस्तुतो द्वयात्मिका भवितुमर्हति । तथापि तादृगनादिवासनावशात् लोकानामत्र दयेति प्रतीतिः । [1]जिनरक्षिताऽभयकुमार[2]मित्रदेवयोः, [3]अरिष्टनेमिमेघप्रभहस्ति-नोश्चागमोदाहरणानि लोकदयाया दयायाश्च भेदं स्पष्टयन्ति ।

असंयमपोषकत्वाद् बलप्रयोगादेः संभवाच्च ॥ ६ ॥

यत्रासंयमपोषणं, बलप्रयोगः, विवशताप्रलोभनादयोऽपि च सम्भवन्ति, तत्र नात्मसाधना भवितुमर्हति ।

क्वचिदियं प्रसंगजापि ॥ ७ ॥

क्वचिदात्मरक्षायां प्रासंगिककार्यरूपेण देशतः सर्वतो वा प्राणरक्षापि भवत्येव । यद् यस्य प्रासंगिकं नहि तत्तद्वस्तुस्वरूपानुप्रवेशीति प्रसंगजप्राणरक्षया नहि आत्मरक्षाया आत्मसाधकत्वं विभावनीयम्, एवं सति क्वचित् प्रसंगजहिंसया तस्याः सदोषत्वमपि भवेत् । विवेचनीयात्र भिक्षुस्वामिप्रदर्शिता दृष्टान्तत्रयी ।

१—ज्ञातृधर्मकथा अध्ययन ९ २—ज्ञातृधर्मकथा अध्ययन १
३—उत्तराध्ययन अध्ययन २२ ४—ज्ञातृधर्मकथा अध्ययन १

अहिंसामय होनेके कारण परमार्थ दया है अतः उसका लोक दयामें ग्रहण नहीं हो सकता।

५—लोक दया मोहमिश्रित होती है अतः उसके द्वारा आत्म-साधना नहीं हो सकती।

दया आत्मशुद्धिके लिए उपयोगी है और लोक-दयासे आत्मशुद्धि होती नहीं, अतः वह वास्तवमें दया नहीं है। सच तो यह है कि दया दो प्रकारकी हो ही नहीं सकती फिर भी अनादिकालीन अविद्यामें फँसेहुए प्राणी उस मोहजनित रक्षाको दया मानते हैं किन्तु *वास्तवमें तो पापमय आचरणोंसे बचाना ही दया है।* जिनरक्षित एवं अभयकुमारका मित्रदेव तथा अरिष्टनेमि एवं मेरुप्रभ हस्ती—इन शास्त्रोक्त उदाहरणोंसे लोक-दया एवं दयाका अन्तर स्पष्टतया जाना जाता है।

६—लोक-दया आत्मसाधक नहीं है, इसके दो कारण और भी हैं। जैसे—वह असंयमकी पोषक है और उसमें बल प्रयोग, विवशता, प्रलोभन आदिके लिए भी स्थान है।

७—कहीं कहीं प्राणरक्षा प्रासंगिक भी होती है।

आत्मरक्षाके साथ प्रासंगिक कार्यके रूपमें आंशिक एवं पूर्ण प्राणरक्षा भी हो जाती है किन्तु जिस वस्तुका जो प्रासंगिक कार्य होता है, वह उसके मौलिक स्वरूप जैसा नहीं होता; इस तथ्यके अनुसार आत्म-रक्षाके प्रसंगमें होनेवाली प्राणरक्षा उसके जैसी नहीं होती यानी आत्मसाधक नहीं होती और उसका (आत्मरक्षाका) आत्मसाधकपन भी उस (प्रासङ्गिक प्राणरक्षा) के कारण नहीं

रागद्वेषपरिणतिर्मोहः ॥ ८ ॥

नायं स्वपरप्रतिबन्धी ॥ ९ ॥

रागात्मा मोह आत्मीयेष्वेव, द्वेषात्मा च परकीयेष्वेवेति प्रतिबन्धो न विचारक्षमः। स्वकुटुम्बस्य पोषणमेव मोहो नान्यस्य, इत्यपि न युक्तम्। उभयत्रापि असंयमाऽविशेषात्।

स्वसामग्रीसापेक्षाऽस्य वृत्तिः ॥ १० ॥

मनोज्ञस्थितिवस्तुवृत्तादिरूपां दीनावस्थादिरूपां वा रागोद्दीपिकाम्, अमनोज्ञस्थितिवस्तुवृत्तादिरूपां च द्वेषोद्दीपिकां सामग्रीमपेक्षमाण एव मोहो वर्तते। न रागोत्पत्तौ परिचितत्वमेव हेतु। यदि अपरिचितानां दृश्यमाने स्फुटमैश्वर्ये भवति द्वेषस्तदा तेषां कारुण्यावस्थायां भवन् रागः केन निवारयितुं शक्येत। दृश्यश्रव्यकाव्यंप्रेक्षकश्रोतृणां तत्तद्भावानुरूपरसोत्पत्तिदर्शनात्, तदनुगामिप्रवृत्तिदर्शनाच्च।

होता। यदि ऐसा माना जाय (प्रासंगिक प्राणरक्षाके कारण आत्मरक्षाका आत्मसाधकपन माना जाय) तो फिर कहीं प्रासंगिक हिंसामें आत्मरक्षाको भी सदोष भी मानना होगा। यहां पर भिक्षुस्वामी प्रदर्शित तीन दृष्टान्तों—चोर, हिंसक और व्यभिचारी का मनन करना चाहिए।

८—रागद्वेषकी परिणतिको मोह कहते हैं।

९—मोहमें स्व या परका प्रतिबन्ध नहीं होता।

रागात्मक मोह आत्मीय जनोंके साथ ही हो और द्वेषात्मक मोह केवल दूसरोंके साथ ही हो, इस प्रकारका कोई नियम नहीं है। अपने कुटुम्बका पोषण करना ही मोह होता है, दूसरोंका पोषण करना मोह नहीं होता, यह मानना भी अयुक्त है क्योंकि असंयम दोनों जगह एकरूपमें विद्यमान रहता है।

१०—मोहकी प्रवृत्ति उसकी अपनी सामग्रीके अनुकूल होती है।

मनोज्ञ स्थिति, वस्तु एवं वृत्तान्त तथा दयनीय दशा इस रागोद्दीपक सामग्रीसे रागात्मक मोह उत्पन्न होता है और अमनोज्ञ स्थिति-वस्तु-वृत्तान्तरूप द्वेषोद्दीपक सामग्रीसे द्वेषात्मक मोह उत्पन्न होता है किन्तु यह आवश्यक नहीं कि राग परिचित जनोंके ही साथ होवे। यदि अपरिचित व्यक्तियोंके ऐश्वर्यको देखकर द्वेष होने लगता है तब फिर उनकी करुणाजनक दशाको देखकर राग क्यों नहीं पैदा होसकता। जबकि दृश्य काव्यों (नाटकों) में दिखाये जानेवाले दृश्योंके अनुसार एवं श्रव्यकाव्योंमें वर्णित किये-जानेवाले भावोंके अनुसार दर्शक एवं श्रोतृगणमें शृङ्गार, करुण

व्यष्टिसमष्ट्यादिष्वपि ॥ ११ ॥

व्यष्ट्यै समष्ट्यै च क्रियमाणेष्वपि कार्येषु अहिंसाद्याचरणमन्तरा मोहस्य वृत्तिर्विभावनीया। परमार्थतस्तु अहिंसादीनामाचरणमेव।

असंयमसुखाभिप्रायो रागः ॥ १२ ॥

असंयममयस्य सुखस्याभिकांक्षणम्—रागोऽभिधीयते।

दुःखाभिप्रायो द्वेषः ॥ १३ ॥

रागद्वेषराहित्यं माध्यस्थ्यम् ॥ १४ ॥

माध्यस्थ्यम्, उपेक्षा, औदासीन्यम्, समतेति पर्यायाः।

हिंसादेरनिवृत्तिरसंयमः ॥ १५ ॥

हिंसाऽनृतस्तेयाब्रह्मपरिग्रहाणामनिवृत्तिरसंयम उच्यते, सपापप्रवृत्तेरप्रत्याख्यानमिति यावत्।

तद्विरतिः संयमः ॥ १६ ॥

हिंसादेर्विरतिः संयमः।

स्वपरोपकारार्थं वितरणं दानम् ॥ १७ ॥

स्वस्य परस्य चोपकारार्थं स्वकीयवस्तुनो वितरणम् दानम्।

संयमोपवर्धकं निरवद्यम् ॥ १८ ॥

आदि रसोंका उद्भव होता है और उनके अनुकूल प्रवृत्ति भी होती है।

११—मोहके क्षेत्र व्यष्टि एवं समष्टि दोनों हैं।

अहिंसा रहित कार्योंमें मोह रहता ही है फिर भलेही वे व्यक्ति के लिए किए जायं या किसी समूहके लिए किए जायं। पारमार्थिक कार्य तो अहिंसाका आचरण ही हैं।

१२—संयमहीन सुखके अभिप्रायको राग कहते हैं।

वही सुखाभिप्राय राग होता है जो असंयममय हो।

१३—दुःखके अभिप्रायको द्वेष कहते हैं।

१४—रागद्वेषरहित अवस्थाको माध्यस्थ्य कहते हैं।

माध्यस्थ्य, उपेक्षा, औदासीन्य और समता ये पर्यायवाची शब्द हैं।

१५—हिंसा, असत्य, स्तेय, अब्रह्मचर्य और परिग्रहसे निवृत्त न होनेका नाम असंयम है।

१६—हिंसा आदिसे विरत होनेका नाम संयम है।

१७—अपने एवं पराये उपकारके लिए अपनी वस्तुका वितरण करना दान है।

१८—संयमको वृद्धि करनेवाला दान निरवद्य होता है।

येन स्वस्य परस्य वा संयम उपचयं याति तन्निरवद्यदानम्—धर्मदानमिति। तच्च संयमिने यथोचितान्नपानादेर्वितरणम्—संयतिदानम्, धर्मोपदेशादेर्वितरणम्—ज्ञानदानम्, हिंसानिवृत्तिः—अभयदानमित्यादिरूपम्। असंयमिदानं सावद्यमिति पारिशेष्यात् सिद्धमेव। लोकव्यवहारोपयोगित्वेन लोकैराश्रितमित्येव नास्तु तस्य निरवद्यत्वम्, अन्यथा कृषिवाणिज्यविवाहादीनामपि निरवद्यत्वप्रसक्तेः।

सद्योगदानमुपकारः ॥ १९ ॥

लौकिको लोकोत्तरश्च ॥ २० ॥

आत्मविकासकृल्लोकोत्तरः ॥ २१ ॥

लोकोत्तरः—पारमार्थिक उपकारः, धर्मोपदेशादिरूपो निरवद्यदानादिरूपो वा।

तदितरस्तु लौकिकः ॥ २२ ॥

लौकिकः—अपारमार्थिक उपकार इत्यर्थः।

इष्टसंयोगाऽनिष्टनिवृत्तोराह्लादः सुखम् ॥ २३ ॥

इष्टम्—धनमित्रादि ज्ञानदर्शनादि वा, अनिष्टम्—शत्रुदौस्थ्यादि कर्माणि वा।

तद्विपर्ययो दुःखम् ॥ २४ ॥

जिस दानसे अपना या परका संयम पुष्ट होता है, उसे निरवद्य-दान—धर्मदान कहते हैं। वह तीन प्रकारका है—संयतिदान—संयमीको यथोचित अन्न-पानी आदि देना, ज्ञानदान—धर्मोपदेश करना, अभयदान—हिंसासे निवृत्त होना। संयतिदानका स्वरूप बतलानेके बाद असंयति-दान सावद्य है, यह अपने आप सिद्ध हो जाता है। इस दानको लोक अपने व्यवहारके लिए उपयोगी मानकर काममें लाते हैं इसलिए वह निरवद्य नहीं बनता। यदि ऐसा ही होता तब तो कृषि, वाणिज्य, विवाह आदि व्यावहारिक कार्य भी निरवद्य क्यों न माने जायं?

१९—सहयोग देना उपकार है।

२०—वह दो प्रकारका होता है—लौकिक और लोकोत्तर।

२१—आत्मविकास करनेवाले उपकारको लोकोत्तर कहते हैं।

धर्मोपदेश करना, निरवद्य दान देना, आदि लोकोत्तर—पारमार्थिक उपकार हैं।

२२—इसके अतिरिक्त उपकारको लौकिक—व्यावहारिक कहते हैं।

२३—इष्टका संयोग होने तथा अनिष्टकी निवृत्ति होनेसे जो आह्लाद होता है, उसे सुख कहते हैं।

धन, मित्र आदि वस्तुएँ तथा ज्ञान आदि इष्ट होते हैं और शत्रु, दरिद्रता एवं ज्ञानावरणादि आठ कर्म ये अनिष्ट होते हैं।

२४—जो इसके विपरीत होता है, ग्लानि होती है, वह दुःख है।

तस्याह्लादस्य विपर्ययो ग्लानिर्दुःखमभिधीयते ।

तच्चात्मविकासावरोधि हेयम् ॥ २५ ॥

यत् सुखदुःखमात्मविकासावरोधं कुरुते तत् हेयम् ।

इति श्रीतुलसीगणिसंकलितायां श्रीजैनसिद्धान्तदीपिकाया-महिंसादयादानोपकारादिस्वरूपनिर्णयो नाम षष्ठः प्रकाशः ।

२५—जो सुख-दुःख आत्मविकासका अवरोधक हो, वह य—छोड़ने योग्य होता है।

इति श्री तुलसीगणि विरचित श्रीजैनसिद्धान्तदीपिकाका अहिंसा, दया, दान और उपकारस्वरूपनिर्णय नामक छठा प्रकाश समाप्त।

सप्तमः प्रकाशः

केवलज्ञानवानर्हन् देवः ॥ १ ॥

अर्हति प्रातिहार्यातिशयानिति अर्हन्, जिनस्तीर्थङ्कर इति यावत् ।

महाव्रतधरः साधुर्गुरुः ॥ २ ॥

स्वपरात्महितं साध्नोतीति साधुः ।

सर्वथा हिंसाऽनृतस्तेयाऽब्रह्मपरिग्रहेभ्यो विरतिर्महाव्रतम् ॥ ३ ॥

सर्वथेति—मनोवाक्कायकृतकारितानुमतिरूपैस्त्रिकरणयोगैर्हिंसादिभ्यः पंचभ्यो निवृत्तिर्महाव्रतं ज्ञेयम् ।

असत्प्रवृत्त्या प्राणव्यपरोपणं हिंसा ॥ ४ ॥

असत्प्रवृत्तिर्वा ॥ ५ ॥

असत्प्रवृत्त्या प्राणानां देशसर्वरूपेण व्यपरोणम्—अतिपातनम्, असत्प्रवृत्तिर्वा हिंसाऽभिधीयते। सत्प्रवृत्त्या तु प्रवर्तमानेन संयमिना संजातोऽपि कश्चित् प्राणवधः, स द्रव्यतो हिंसापि भावतोऽहिंसा एव स्वप्रवृत्तेरदूषितत्वात् । तथा चागमः—

सातवाँ प्रकाश

१—केवलज्ञानी सर्वज्ञ अर्हन्को देव कहते हैं।

जो प्रातिहार्य[1] अतिशयोंके योग्य होते हैं, वे अर्हन् कहलाते हैं। जिन और तीर्थंकर भी उन्हींके नाम हैं।

२—महाव्रतोंको पालनेवाले साधु गुरु होते हैं।

अपने एवं पराये हितको साधता है, उसे साधु कहते हैं।

३—हिंसा, असत्य, चोरी, अब्रह्मचर्य और परिग्रह इनको सर्वथा त्यागनेका नाम महाव्रत है।

सर्वथा त्यागनेका अर्थ हिंसा आदिका आचरण तीन करण तीन योगसे स्वयं न करना, दूसरोंसे न कराना, करते हुएका अनुमोदन न करना, मनसे वाणीसे और शरीरसे—त्यागना।

४+५—असत्प्रवृत्तिके द्वारा होनेवाले प्राणवधको हिंसा कहते हैं अथवा असत्प्रवृत्ति ही हिंसा है।

सत्प्रवृत्तिमें प्रवृत्त संयमी पुरुषों द्वारा यदि कोई प्राणवध हो भी जाय तो वह द्रव्य हिंसा—व्यावहारिकरूपसे हिंसा है, भाव-हिंसा—वास्तविक हिंसा नहीं। क्योंकि उनकी वह प्रवृत्ति राग-

---

१ विशिष्ट महिमाशाली।

"तत्थणं' जेते पमत्त संजया ते सुहं जोगं पडुच्च नोणं आयारंभा नोपरारंभा जाव अणारंभा, असुभं जोगं पडुच्च आयारंभा वि, जाव नो अणारंभा।"

रागद्वेषप्रमादमयव्यापारो ऽसत्प्रवृत्तिः॥ ६ ॥

प्रमादः—असावधानता।

असद्भावोद्भावनमनृतम्॥ ७ ॥

असतः—अविद्यमानस्यार्थस्य उद्भावनम्—प्रकटनम्, अनृतं गीयते।

अदत्तादानं स्तेयम्॥ ८ ॥

अदत्तस्य ग्रहणमित्यर्थः।

मैथुनमब्रह्म॥ ९ ॥

मिथुनस्य—युग्मस्य कर्म मैथुनम्।

मूर्च्छा परिग्रहः॥ १० ॥

मूर्च्छा—ममत्वम्, सैव परिग्रहः, न तु वस्तुपरिग्रहणमात्रमेव, यथा—संयमिनां धर्मोपकरणानि।

तथा चागमः—

१—भगवती श० १ उ० १

द्वेश-शून्य होती है, आगम इस बातका साक्षी है। जैसे—

"प्रमत्त संयति—छठे गुणस्थानवाले साधु शुभयोगकी अपेक्षा न तो आत्मारम्भी हैं, न परारम्भी हैं किन्तु अनारंभी—हिंसासे मुक्त हैं। और अशुभयोगकी अपेक्षा वे आत्मारंभी हैं, परारम्भी हैं किन्तु अनारंभी नहीं हैं।

६—राग, द्वेश एवं प्रमादात्मक चेष्टाओंको असत्प्रवृत्ति कहते हैं।

यहां प्रमादका अर्थ असावधानता है।

७—असत् भावोंको—अविद्यमान या अयथार्थ भावोंको प्रकट करनेका नाम अनृत (असत्य) है।

८—विना दी हुई वस्तुको लेना स्तेय (चोरी) है।

९—मैथुनको अब्रह्मचर्य कहते हैं।

मिथुन—स्त्री पुरुषके जोड़ेकी काम-राग जनित चेष्टायें, मैथुन हैं और उसीका नाम अब्रह्मचर्य है।

१०—मूर्च्छाको परिग्रह कहते हैं।

यह वस्तु मेरी है—ऐसी भावनाको ममत्व कहते हैं। ममत्व का दूसरा नाम मूर्च्छा है और वही परिग्रह है। केवल वस्तुओंको ग्रहण करना ही परिग्रह नहीं होता, जिस प्रकार संयमीके धर्मोपकरण अपरिग्रह हैं। कहा भी है—"संयमी पुरुष जो भी वस्त्र, पात्र, कम्बल और पादप्रोंछन आदि धर्मोपकरण संयम एवं लज्जा की रक्षाके निमित्त रखते हैं—व्यवहारमें लाते हैं, भगवान् महा-

जंपि[१] वत्थं च पायं वा कंबलं पायपुंछणम्।
तंपि संजमलज्जठा धारंति परिहरंति य॥
न सो परिग्गहो वुत्तो नायपुत्तेण ताइणा।
मुच्छा परिग्गहो वुत्तो इइ वुत्तं महेसिणा॥

संयमानुकूला प्रवृत्तिः समितिः॥ ११॥

ईर्याभाषैषणादाननिक्षेपोत्सर्गाः॥ १२॥

आगमोक्तविधिना प्रस्थानमीर्या॥ १३॥

आगमोक्तविधिनेति—युगप्रमितभूमिप्रेक्षणस्वाध्यायविषयविवर्जनादिरूपेण।

अनवद्यभाषणं भाषा॥ १४॥

सम्यग् आलोच्य सिद्धान्तानुमत्या भाषणमित्यर्थः।

निर्दोषान्नपानादेरन्वेषणमेषणा॥ १५॥

तत्र आधाकर्मादयः षोडश उद्गमदोषाः[२], धात्र्यादयः षोडश उत्पादन-दोषाः[३], शंकितादयश्च दश एषणा दोषाः।

---

१ दशवैकालिक अ० ६ गा० २०-२१।
२—उद्गमनम्—उद्गमः, आहारादेरुत्पत्तिस्तत्र ये दोषास्ते उद्गमदोषाः।
३—उत्पादनम्—आहारादेः प्राप्तिस्तत्र।

वीरने उन्हें परिग्रह नहीं कहा है। महर्षि महावीर ने मूर्च्छाको परिग्रह कहा है।"

११—संयमानुकूल प्रवृत्तिको समिति कहते हैं।

१२—वह पांच प्रकारकी होती है—ईर्या, भाषा, एषणा, आदान-निक्षेप और उत्सर्ग।

१३—शास्त्रकथित विधिके अनुसार चलनेको ईर्यासमिति कहते हैं।

संयमीको युगझूसर (जुआ) प्रमाण भूमिको देखते हुए तथा स्वाध्याय एवं इन्द्रिय विषयोंको वरजते हुए चलना चाहिए, यह शास्त्रीय विधि है।

१४—पापरहित बोलना भाषासमिति है।

संयमीको सिद्धान्तके आदेशानुसार सम्यक् आलोचनापूर्वक ही बोलना चाहिए।

१५—निर्दोष आहार, पानी आदि वस्तुओंका अन्वेषण करना एषणासमिति है।

भिक्षाके ४२ दोष होते हैं। उनमें आधाकर्म आदि सोलह उद्गम दोष, धात्री आदि सोलह उत्पादन दोष और शंकित आदि दश एषणा दोष होते हैं।

उपध्यादेः सयत्नं व्यापरणमादाननिक्षेपः ॥ १६ ॥

उपध्यादेर्वस्त्रपात्रादेः व्यापरणम्—व्यवहरणम् ।

उच्चारादेः सविधिपरिष्ठापनमुत्सर्गः ॥ १७ ॥

सविधीति—प्रत्युपेक्षितप्रमार्जितभूम्यादौ, परिष्ठापनम्—परित्यजनम् ।

मनोवाक्कायनिग्रहो गुप्तयः ॥ १८ ॥

मोक्षसाधने प्रवृत्तिप्रधाना समितिः, निवृत्तिप्रधाना च गुप्तिः, समितौ गुप्तिरवश्यं भाविनी, गुप्तौ समितिर्भजनया इत्यनयोर्भेदः ।

भवारम्भेपौद्गलिकसामर्थ्यनिर्माणं पर्याप्तिः ॥ १९ ॥

आहारशरीरेन्द्रियोच्छ्वासनिःश्वासभाषामनांसि ॥ २० ॥

तत्र आहारप्रायोग्यपुद्गलग्रहणपरिणमनोत्सर्गरूपं पौद्गलिकसामर्थ्योत्पादनम्—आहारपर्याप्तिः । एवं शरीरादिपर्याप्तयोऽपि भावनीयाः । षण्णामपि प्रारंभः उत्पत्तिसमये, पूर्त्तिस्तु आहारपर्याप्तेरेकसमयेन शेषाणां च क्रमेण एकैकेनाऽन्तमुहूर्त्तेन । यत्र भवे येन यावत्यः पर्याप्तयः करणीयाः, तावतीष्वसमाप्तासु सोऽपर्याप्तः, समाप्तासु च पर्याप्त इति ।

१६—वस्त्र, पात्र आदिको सावधानीसे लेना, रखना, आदाननिक्षेप-समिति है।

१७—मल-मूत्र आदिका विधिपूर्वक—पहले देखी हुई एवं प्रमार्जित भूमिमें विसर्जन करना उत्सर्ग-समिति है।

१८—मन, वचन और शरीरका निग्रह करना क्रमशः मनो-गुप्ति, वाक्-गुप्ति और काय-गुप्ति हैं।

मोक्ष-साधनामें समिति प्रवृत्तिप्रधान होती है और गुप्ति निवृत्ति प्रधान। जहां समिति होती है, वहां गुप्ति अवश्य होती है और गुप्तिमें समितिका होना अवश्यंभावी नहीं है, यही इन दोनोंका अन्तर है।

१९—जन्मके प्रारम्भमें जो पौद्गलिक शक्तिका निर्माण होता है, उसे पर्याप्ति कहते हैं।

२०—पर्याप्तियां छः हैं—आहार पर्याप्ति, शरीर पर्याप्ति, इन्द्रिय पर्याप्ति, श्वासोच्छ्वास पर्याप्ति, भाषा पर्याप्ति, और मनः पर्याप्ति।

आहारके योग्य पुद्गलोंका ग्रहण, परिणमन एवं उत्सर्ग करने वाले पौद्गलिक शक्तिके निर्माणको आहारपर्याप्ति कहते हैं। इसी प्रकार शरीर, इन्द्रिय, श्वासोच्छ्वास, भाषा और मनके योग्य पुद्गलोंका ग्रहण, परिणमन एवं उत्सर्ग करनेवाली पौद्गलिक शक्तियोंके निर्माणको क्रमशः शरीरपर्याप्ति, भाषापर्याप्ति और मनःपर्याप्ति कहते हैं। इन छओंका निर्माण जन्मके समय एक साथ ही शुरू होता है और पूर्ण होनेमें आहारपर्याप्तिको एक

तदपेक्षिणी जीवनशक्तिः प्राणाः ॥ २१ ॥

इन्द्रियबलोच्छ्वासनिःश्वासाऽऽयूंषि ॥ २२ ॥

तत्र पंच इन्द्रियाणि, मनोवाक्कायरूपं बलत्रयम्, श्वास-निःश्वास-आयुश्चेति दशविधाः प्राणाः।

आत्मशुद्धिसाधनं धर्मः ॥ २३ ॥

तथा चोक्तम्—दुर्गतौ प्रपतज्जन्तुधारणाद्धर्म उच्यते।

संवरो निर्जरा च ॥ २४ ॥

द्विविधः स धर्मः, तत्र संवरः—संयमः, निर्जरा—तपः।

ज्ञानदर्शनचारित्रतपांसि ॥ २५ ॥

चतुर्विधो वा धर्मः, ज्ञानम्—तत्त्वनिर्णयः, दर्शनम्—तत्त्वश्रद्धा, चारित्रम्-संयमः, तपः—अनशनादि।

क्षान्तिमुक्त्यार्जवमार्दवलाघवसत्यसंयमतपस्त्यागब्रह्मचर्याणि वा ॥ २६ ॥

समय तथा शेप सबको क्रमशः एक-एक अन्तर्मुहूर्त्त लगता है। जिस जन्ममें जिसे जितनी पर्याप्तियां करनी होती हैं, वह जीव उनको समाप्त न करने तक अपर्याप्त और समाप्त करने पर पर्याप्त कहलाता है।

२१—पर्याप्तिकी अपेक्षा रखनेवाली जीवनशक्तिको प्राण कहते हैं।

२२—प्राण दस हैं।

पांच इन्द्रिय-प्राण—स्पर्शन-इन्द्रिय-प्राण, रसन-इन्द्रिय-प्राण, घ्राण-इन्द्रिय-प्राण, चक्षु-इन्द्रिय-प्राण, श्रोत्र-इन्द्रिय-प्राण, मनो-बल, वचन-बल, काय-बल, श्वासनिःश्वास प्राण, आयुष्य-प्राण।

२३—आत्म-शुद्धिके साधनको धर्म कहते हैं।

कहा भी है—"दुर्गतिमें गिरते हुए जीवोंको धारण करे, उसका नाम धर्म है।"

२४—धर्मके दो भेद हैं—सम्वर—संयम और निर्जरा—तप।

२५—धर्मके चार भेद भी होते हैं—ज्ञान, दर्शन, चारित्र और तप।

ज्ञान—तत्त्व-निर्णय करना, दर्शन—तत्त्व श्रद्धा, चारित्र—संयम, तप—अनशन आदि।

२६—धर्मके दस भेद भी किये जाते हैं—क्षान्ति—क्षमा, मुक्ति—निर्लोभता, आर्जव—सरलता, मार्दव—कोमलता, लाघव—अकिञ्चनता, सत्य, संयम—तप, त्याग, धर्मदान और ब्रह्मचर्य।

क्षान्त्यादिभेदेन दशविधो वा धर्मः। तेषु मुक्तिः—निर्लोभता, लाघवम्—अकिञ्चनता, त्यागः—धर्मदानम्। शेषं स्पष्टम्।

आत्मनैर्मल्यकारणत्वेनासौ लोकधर्माद् भिन्नः ॥ २७ ॥

अपरिवर्तनीयस्वरूपत्वेन सर्वसाधारणत्वेन च ॥ २८ ॥

लोकधर्मः देशकालादिभिः परीवर्तनीयस्वरूपो वर्गविशेषैर्विभेदमापन्नश्च, धर्मस्तु आत्मनैर्मल्यकारणम्, अपरिवर्तनीयस्वरूपः सर्वसाधारणश्च इत्यनयोर्भेदः। गृहस्थसन्यस्तयोर्धर्मः केवलं पालनशक्त्यपेक्षया महाव्रताऽणुव्रतभेदेन द्विधा निर्दिष्ट इति धर्मस्य सर्वसाधारणत्वे नास्ति कश्चिद् विरोधः।

ग्रामनगरराष्ट्रकुलजातियुगादीनामाचारो व्यवस्था वा लोकधर्मः ॥ २९ ॥

ग्रामादिषु जनानामौचित्येन वित्तार्जनव्ययविवाहभोज्यादिप्रथानां पारस्परिकसहयोगादेर्वा आचरणम्—आचारः। तेषां च हितसंरक्षणार्थं प्रयुज्यमाना उपायाः—व्यवस्था—कौटुम्बिकी, सामाजिकी, राष्ट्रिया, अन्ताराष्ट्रिया चेति

२७—धर्म आत्मशुद्धिका साधन है अतएव वह लोकधर्मसे भिन्न है।

२८—उसका स्वरूप कभी परिवर्तित नहीं होता एवं वह सर्वदा सर्व जगह, सब व्यक्तियोंके लिए एक समान होता है, इन कारणोंसे भी वह धर्म लोकधर्मसे भिन्न है।

लोकधर्म और धर्ममें निम्न तीन हेतुओंके द्वारा अन्तर दिखलाया गया है—लोकधर्मसे दुनियाका व्यवहार चलता है और धर्मसे आत्माकी शुद्धि होती है। देश, काल, आदिके परिवर्तनसे लोकधर्मके स्वरूपमें परिवर्तन होता रहता है किन्तु धर्मका स्वरूप सर्वत्र, सदा अपरिवर्तित रहता है। लोकधर्म भिन्न-भिन्न वर्गोंमें भिन्न भिन्न रूपसे प्रचलित होता है किन्तु धर्मका आचरण सबके लिए एक रूप ही होता है। गृहस्थ और संन्यासीके धर्म दो नहीं हैं, केवल आचरणकी क्षमताके आधार पर उसके महाव्रत और अणुव्रत ये दो मार्ग बतलाये गये हैं। अतः धर्म सर्वसाधारण है, इसमें कोई दोष नहीं आता।

२९—गांव, नगर, राष्ट्र, कुल, जाति और युग, इनमें विद्यमान आचार और व्यवस्थाको लोकधर्म कहते हैं।

गांव आदिमें औचित्यके द्वारा धनोपार्जन, व्यय, विवाह, भोज आदि प्रथाओंका एवं पारस्परिक सहयोग आदिका जो आचरण किया जाता है, उसका नाम आचार है तथा गांव नगर आदिके

बहुविधा। ते च लोकधर्मः—लौकिको व्यवहार इत्युच्यते। आगमेऽपि तथा-दर्शनात्, यथा—

'गामधम्मे,'[1] नगरधम्मे, रट्ठधम्मे, कुलधम्मे, गणधम्मे इत्यादि'।

लोकधर्मेऽपि क्वचिदहिंसादीनामाचरणं भवति, तदपेक्षयाऽनेन धर्मस्य भिन्नता न विभावनीया, किन्तु भोगोपवर्धकवस्तु-व्यवहारापेक्षयैव।

लौकिकोऽभ्युदयो धर्मानुषङ्गिकः ॥३०॥

लौकिकोऽभ्युदयः—कुलबलवपुर्विभवैश्वर्यमन्त्रतन्त्रादिविषया सांसारिकी समृद्धिः।

अर्हदुपदेशआज्ञा ॥३१॥

अर्हतां तीर्थंकराणामात्मशुद्धि-उपायभूतः—उपदेश आज्ञा इत्यभिधीयते। यत्राज्ञा तत्रैव धर्मः। अर्हतां सकलदोषाऽकलंकितोपदेशकत्वान्न खलु धर्मस्तदाज्ञां व्यभिचरति।

इति श्रीतुलसीगणिसंकलितायां श्रीजैनसिद्धान्तदीपिकायां देवगुरुधर्मस्वरूपनिर्णयो नाम सप्तमः प्रकाशः।

१—स्था० स्था० १०।

हितोंकी रक्षाके लिए जो उपाय काममें लाये जाते हैं, उनका नाम व्यवस्था है। वह अनेक प्रकार की होती है। जैसे—कुटुम्ब व्यवस्था, समाज व्यवस्था, राष्ट्र व्यवस्था, अन्तर्राष्ट्र व्यवस्था। इन दोनों—आचार और व्यवस्थाको लोकधर्म—लौकिकव्यवहार कहते हैं। आगममें भी ऐसी परिभाषा उपलब्ध होती है। जैसे—"ग्रामधर्म, नगरधर्म, राष्ट्रधर्म, कुलधर्म, गणधर्म" इत्यादि लोकधर्ममें भी क्वचित् अहिंसा आदिका आचरण होता है। इसकी अपेक्षा उस (लोकधर्म) से धर्म भिन्न नहीं किन्तु लोकधर्मम जो भोगोपवर्धक वस्तुओंका व्यवहार होता है, इस अपेक्षा वह भिन्न है।

३०—लौकिक अभ्युदय धर्मका प्रासंगिक फल है।

कुल, बल, शरीर, वैभव, ऐश्वर्य एवं यन्त्रतन्त्र आदिसे सम्बन्धित सांसारिक उन्नतिको लौकिक अभ्युदय कहते हैं।

३१—अरिहन्तके उपदेशको आज्ञा कहते हैं।

तीर्थङ्कर आध्यात्मिक विकासके लिए उपदेश देते हैं, वह उपदेश ही उनकी आज्ञा है और जहां आज्ञा है, वहीं धर्म है क्योंकि अरिहन्त सर्व दोषमुक्त उपदेशक होते हैं अतः उनकी आज्ञाके अतिक्रमणमें धर्म नहीं हो सकता।

इति श्री तुलसीगणि विरचित श्री जैनसिद्धान्तदीपिकाका देव-गुरु-धर्म-स्वरूप-निर्णय नामक सातवां प्रकाश समाप्त।

अष्टमः प्रकाशः

आत्मनः क्रमिकविशुद्धिर्गुणस्थानम् ॥ १ ॥

कर्मक्षयोपशमादिजन्या क्रमेण[1] गुणाविर्भावरूपा विशुद्धिः गुणस्थानम्। तच्च सिद्धिसौधसोपानपंक्तिकल्पम्।

मिथ्यासास्वदनसम्यग्मिश्राविरतसम्यग्दृष्टिदेशविरत-
प्रमत्ताऽप्रमत्तसंयतनिवृत्त्यनिवृत्तिबादरसूक्ष्मसंपरायो-
पशान्तक्षीणमोहसयोग्ययोगिकेवलिनः ॥ २ ॥

मिथ्यादिभ्यश्चतुर्भ्यः दृष्टिशब्दो योज्यः। तत्र मिथ्यादृष्टेर्दर्शनमोह-क्षयोपशमादिजन्या विशुद्धिः—मिथ्यादृष्टिगुणस्थानम्। प्रमादान्नवयुक्तो मुनिः—प्रमत्तसंयतः। निवृत्तिप्रधानो[2] बादरः स्थूलकषायो यस्य स निवृत्ति-बादरः। एवमनिवृत्तिबादरः[3]। सूक्ष्मः कषायः सूक्ष्मसंपरायः। शेषं स्पष्टम्। एतेषु प्रथमम्—अनाद्यनन्तम्, अनादिसान्तम्, सादि सान्तञ्च।

१—क्रमेण विशुद्धिः क्रमिकविशुद्धिः।

२—अत्र हि बादरसंपरायस्य मोहप्रकृतिरूपस्य स्वल्पापि निवृत्तिः विवक्षा-वशात् प्राधान्येन परिगणितेति निवृत्तिबादरगुणस्थानम्।

३—अत्र स्वल्पापि बादरकषायस्यानिवृत्तिः विवक्षावशात् प्राधान्येन परिग-णितेति अनिवृत्तिबादरगुणस्थानम्।

आठवां प्रकाश

१—आत्माकी क्रमिक विशुद्धिको गुणस्थान कहते हैं।

आत्माकी क्रमिक विशुद्धि—गुणोंका प्रादुर्भाव, कर्ममल दूर होने से ही होती है, उस विशुद्धिको गुणस्थान कहते हैं। वह (गुण स्थान) मोक्षरूपी प्रासादकी सोपानश्रेणीके समान होता है।

२—गुण स्थान १४ होते हैं—मिथ्यादृष्टि, सास्वादन, सम्यक्दृष्टि, मिश्रदृष्टि, अविरतसम्यक्दृष्टि, देशविरत, प्रमत्त संयत, अप्रमत्त-संयत निवृत्तिबादर, अनिवृत्तिबादर, सूक्ष्मसंपराय, उपशान्त-मोह, क्षीणमोह, सयोगि केवली और अयोगि केवली।

मिथ्यादृष्टिकी दर्शनमोह आदिके क्षयोपशमसे होनेवाली विशुद्धिको मिथ्यादृष्टि गुणस्थान कहते हैं। प्रमादआस्रवयुक्त मुनि को प्रमत्त संयत कहते हैं। जिसमें कषाय निवृत्त होना तो शुरू हो जाता है किन्तु निवृत्त कम हो पाता है, उसको निवृत्ति बादर कहते हैं और जिसमें कषाय अधिक निवृत्त हो जाता है, उसका कुछ अंश अनिवृत्त (बाकी) रहता है, उसे अनिवृत्ति बादर कहते हैं। जिसमें सूक्ष्म कषाय (लोभांश) विद्यमान रहता है, उसे सूक्ष्म संपराय कहते हैं। इनमें पहला गुणस्थान अनादि अनन्त, अनादि-सान्त और सादि सान्त है। दूसरेकी छः अवलिकाकी, चौथेकी

द्वितीयं षडावलिका स्थितिकम्। चतुर्थं साधिकत्रयस्त्रिंशत्सागरमितम्। पञ्चमषष्ठत्रयोदशानि देशोनपूर्वकोटिस्थितिकानि। चतुर्दशं पञ्च ह्रस्वाक्षरोच्चारणमात्रम्। शेषाणां जघन्या[1] च सर्वेषामन्तर्मुहूर्त्ता स्थितिः।

तत्त्वं तत्त्वांशं वा मिथ्या श्रद्दधानो मिथ्यादृष्टिः ॥ ३ ॥

मिथ्यात्वीति यावत्। विपरीत दृष्टयपेक्षयैव जीवो मिथ्यादृष्टिः स्यात्, न तु अवशिष्टाऽविपरीत दृष्टयपेक्षया। मिथ्यादृष्टौ मनुष्यपश्वादिप्रतिपत्तिरविपरीता समस्त्येवेति तद् गुणस्थानमुक्तम्, किञ्च नास्त्येतादृक् कोऽप्यात्मा, यस्मिन् क्षयोपशमादिजन्या नाल्पीयस्यपि विशुद्धिः स्यात्, अभव्यानां निगोदजीवानामपि च तत्सद्भावात्, अन्यथा जीवत्वापत्तेः।

संदिहानः सम्यग् मिथ्यादृष्टिः ॥ ४ ॥

यः एकं तत्त्वं तत्त्वांशं वा संदिग्धे शेषं सम्यक् श्रद्धत्ते स सम्यक्मिथ्यादृष्टिः सम्यक्मिथ्यात्वीति यावत्।

१—आयुः पूर्त्यपेक्षया सप्तमाद् एकादशपर्यन्तानां गुणस्थानानां जघन्या स्थितिरेकसामयिक्यपि।

कुछ अधिक तेतीस सागरकी, पांचवें, छठे और तेरहवेंकी कुछ कम कोड़ पूर्वकी स्थिति होती है। चौदहवेंकी स्थिति पांच ह्रस्वाक्षर अ, इ, उ, ऋ, ऌ के उच्चारणकाल जितनी होती है। शेष* सब गुणस्थानोंकी स्थिति और पूर्वोक्त गुणस्थानोंकी जघन्य स्थिति अन्तर्मुहूर्त्तकी होती है।

३ – तत्त्व पर या तत्त्वांश पर मिथ्या विश्वास रखनेवालेको मिथ्या-दृष्टि कहते हैं।

मिथ्यादृष्टिका दूसरा नाम मिथ्यात्वी है। जीव विपरीत दृष्टिकी अपेक्षासे मिथ्यादृष्टि होता है किन्तु उसमें जो अविपरीत दृष्टि होती है, उसकी अपेक्षासे नहीं। मिथ्यादृष्टिमें मनुष्य, पशु आदिको जाननेकी अविपरीत दृष्टि होती ही है अतः मिथ्यादृष्टि का गुणस्थान बतलाया गया है। क्योंकि ऐसी कोई भी आत्मा नहीं है, जिसके क्षयोपशमजन्य थोड़ी भी विशुद्धि न हो और दूसरों की तो बात ही क्या, अभव्य एवं निगोदके जीवोंके भी वह विशुद्धि होती है और वह स्वीकार किये बिना उनमें (मिथ्यात्वियोंमें) और अजीवमें कोई अन्तर ही नहीं रहता।

४—तत्त्व एवं तत्त्वांश पर सन्देह रखनेवालेको सम्यग्मिथ्यादृष्टि —सम्यग्मिथ्यात्वी कहते हैं।

मिथ्यादृष्टि, सम्यग्मिथ्यादृष्टि और सम्यग्दृष्टिकी तत्त्वरुचि भी मिथ्यादृष्टि, सम्यग्मिथ्यादृष्टि एवं सम्यग्दृष्टि कहलाती है।

---

* आयुपूर्तिकी अपेक्षासे सातवेंसे ग्यारहवें गुणस्थान तककी जघन्य स्थिति एक समयकी भी होती है।

सम्यक् तत्त्वं श्रद्धालुः सम्यग्दृष्टिः ॥ ५ ॥

सकलमपि जीवाजीवादिकं तत्त्वं सम्यक् श्रद्धत्ते स सम्यग्दृष्टिः, सम्यक्त्वीति यावत्। मिथ्यादृष्ट्यादीनां तत्त्वरुचिरपि क्रमेण मिथ्यादृष्टिः, सम्यग्मिथ्यादृष्टिः, सम्यग्दृष्टिश्चेति प्रोच्यते।

शमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्यानि तल्लक्षणम् ॥ ६ ॥

शमः—क्रोधादीनामुपशमः। संवेगः—मोक्षाभिलाषः। निर्वेदः—भवविरागः। अनुकम्पा—दया। आस्तिक्यम्—आत्मकर्मादिषु विश्वासः।

शंकाकांक्षापरपाषण्डप्रशंसासंस्तवश्च दूषणम् ॥ ७ ॥

तत्त्वसन्देहः—शंका। कुमताभिलाष—कांक्षा। धर्मफलसंशय—विचिकित्सा। व्रतभ्रष्टानां प्रशंसा परिचयश्च परपाषण्ड प्रशंसा, परपाषण्ड संस्तवश्च।

असंयतोऽविरतः ॥ ८ ॥

सर्वथा विरतिरहित इत्यर्थः।

संयताऽसंयतो देशविरतः ॥ ९ ॥

देशेन—अंशरूपेण व्रताराधकः इत्यर्थः। पूर्णव्रताभावेऽविरतोऽप्यसौ कथ्यते।

५—तत्त्वों पर सत्य श्रद्धा रखनेवालेको सम्यग्दृष्टि—सम्यक्त्वी कहते हैं।

६—सम्यग्दृष्टिके पांच लक्षण होते हैं – शम, संवेग, निर्वेद, अनुकम्पा और आस्तिक्य।

क्रोधादिके उपशमको शम कहते हैं। मोक्षकी अभिलाषाका नाम संवेग है। निर्वेदका अर्थ है—संसारसे विरत होना। अनुकम्पा, दया, आस्तिक्यका अर्थ है—आत्मा, कर्म आदि—पर विश्वास करना।

७—शंका, कांक्षा, विचिकित्सा, परपाषण्डप्रशंसा, और परपाषण्डपरिचय इन पांच दोषोंसे सम्यक्त्व दूषित होती है।

शंका—तत्त्वोंमें सन्देह करना। कांक्षा—कुमतकी वाञ्छा करना। विचिकित्सा—धर्मके फलमें सन्देह करना। परपाषण्डप्रशंसा—मिथ्यादृष्टि और व्रतभ्रष्ट पुरुषोंकी प्रशंसा करना। परपाषण्डपरिचय—मिथ्यादृष्टि और व्रतभ्रष्ट पुरुषोंका परिचय करना।

८—असंयत—जिसके कोई भी विरति नहीं होती है, उसको अविरत कहते हैं।

९—संयतासंयत—अंशरूपसे व्रतका पालन करनेवालेको देशविरत कहते हैं।

अणुव्रतशिक्षाव्रते देशव्रतम् ॥ १० ॥

स्थूलहिंसाऽनृतस्तेयाऽब्रह्मपरिग्रहविरतिरणुव्रतम् ॥ ११ ॥

दिगुपभोगपरिभोगाऽनर्थदण्डविरतिसामायिकदेशावकाशिक-
पौषधोपवासाऽतिथिसंविभागाः शिक्षाव्रतम् ॥ १२ ॥

एषु शेषचतुष्कमेव भूयोऽभ्यासात्मकत्वात् शिक्षाव्रतम्। आद्यत्रयञ्च अणुव्रतानां गुणवर्धकत्वाद् गुणव्रतम्, क्वचिदित्यपि व्यवस्था।

सर्वव्रतः संयतः ॥ १३ ॥

सर्वव्रताराधको महाव्रतीत्यर्थः।

सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातानि
चारित्रम् ॥ १४ ॥

तत्र सर्वसावद्ययोगविरतिरूपम्—सामायिकम्। पूर्वपर्यायच्छेदेन उपस्थाप्यते—महाव्रतेष्वारोप्यते इति च्छेदोपस्थाप्यम्। द्वे अपि षष्ठात् नवमगुणस्थानान्तर्वर्त्तिनी। परिहारेण तपोविशेषेण विशुद्धिरूपम—परिहारविशुद्धिः, सप्तमषष्ठयोः। दशमस्थम्—सूक्ष्मसंपरायः। वीतरागावस्थम्—यथाख्यातम्

संयतासंयत पूर्णव्रती नहीं होता इसलिए उसे कहीं कहीं अविरत भी कहा जाता है।

१०—अणुव्रत और शिक्षाव्रतको देशविरति कहते हैं।

११—स्थूल हिंसा, असत्य, अचौर्य्य, अब्रह्मचर्य, अपरिग्रह इनकी विरतिको अणुव्रत कहते हैं।

१२—दिग्, उपभोग-परिभोग, अनर्थदण्डविरति, सामायिक, देशावकाशिक, पौषधोपवास, अतिथिसंविभाग, इनको शिक्षाव्रत कहते हैं।

इनकी कहीं कहीं ऐसी व्यवस्था भी मिलती है कि इन सात व्रतोंमें शेष चार व्रत ही अभ्यासात्मक होनेके कारण शिक्षाव्रत हैं। और पहले तीन, अणुव्रतोंके गुणवर्द्धक होनेके कारण गुणव्रत हैं।

१३—पूर्णव्रतीको संयत कहते हैं।

१४—सामायिक, छेदोपस्थाप्य, परिहारविशुद्धि, सूक्ष्मसम्पराय और यथाख्यात ये पांच चारित्र हैं।

मोक्षके लिए कियेजानेवाले प्रकृष्ट आचरण—त्यागको चारित्र कहते हैं। सर्वथा सावद्य योगोंकी विरतिको सामायिक कहते हैं। पूर्व अवस्थाको छेदकर महाव्रतोंमें अवस्थित करनेको छेदोपस्थाप कहते हैं। ये दोनों छठेसे नौवें गुणस्थानतक होते हैं। परिहार का अर्थ है—एक प्रकारकी तपस्या, उससे जो विशुद्धिरूप चारित्र होता है, उसे परिहारविशुद्धि कहते हैं। वह सातवें, छठे

पुलाकबकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः ॥ १५ ॥

बाह्याभ्यन्तर[1]परिग्रहग्रन्थिरहितः—निर्ग्रन्थः। तत्र पुलाको निस्सारो धान्यकणः, तद्वत् संयमं मनागसारं कुर्वन् निर्ग्रन्थः—पुलाक उच्यते; स च द्विविधः—लब्ध्या आसेवनया च। बकुशं कर्बुरं चारित्रं यस्य स बकुशः। कुत्सितं शीलं यस्य स कुशीलः; द्विविधोऽयम्—प्रतिसेवनाकुशीलः, कषाय-कुशीलश्च। मोहनीयग्रन्थिरहितः निर्ग्रन्थः—वीतरागः। स्नात इव स्नातकः केवलीति

संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपातस्थानादिविकल्पतो भावनीयाः ॥१६॥

पंचापि निर्ग्रन्था एतैर्भेदैर्विचारणीयाः। यथा सामायिकादौ कस्मिन् संयमे भवन्ति, कियत् श्रुतमधीयते, मूलोत्तरगुणेषु प्रतिसेवना क्रियते न वा,

१—बाह्यपरिग्रहः क्षेत्रवस्त्वादिभेदेन नवविधः, मिथ्यात्वं, नव नोकषायाः कषाय चतुष्टयं चेति चतुर्दशविध आभ्यन्तरः।

गुणस्थानमें होता है। जिसमें कषाय सूक्ष्म होता है, उसे सूक्ष्मसंपराय-चारित्र कहते हैं। वीतरागचारित्रको यथाख्यातचारित्र कहते हैं।

१५—निर्ग्रन्थ (साधु) पांच प्रकारके होते हैं—पुलाक, वकुश, कुशील, निर्ग्रन्थ और स्नातक।

जो वाह्य एवं आभ्यन्तरकी ग्रन्थिसे मुक्त होता है, उसे निर्ग्रन्थ कहते हैं। सार रहित धान्यकणोंका नाम पुलाक है, पुलाककी तरह संयमको कुछ निस्सार करनेवाला निर्ग्रन्थ पुलाक कहलाता है। वह दो प्रकारका होता है—लब्धिपुलाक और आसेवना (दोषाचरण) पुलाक। जिसका चारित्र कावरचितरा—अतिचार के धब्बोंवाला होता है, उसे वकुश कहते हैं। कुत्सित आचारवाले को कुशील कहते हैं और वह दो प्रकारका होता है—प्रतिसेवना-कुशील—जो दोषाचरणसे मलिन होता है। दूसरा कषायकुशील—जो कषायसे मलिन होता है। मोहकी ग्रन्थिसे रहित होता है, उसे निर्ग्रन्थ—वीतराग कहते हैं। पूर्ण शुद्धको स्नातक (केवली) कहते हैं।

१६—संयम, श्रुत, प्रतिसेवना, तीर्थ, लिंग, लेश्या, उपपात, स्थान आदिके भेदसे निर्ग्रन्थोंके अनेक भेद होते हैं।

जैसे इन पांचों प्रकारके निर्ग्रन्थोंमें सामायिक आदि कौनसा चारित्र होता है, श्रुतका अध्ययन कितना करते हैं, मूल एवं उत्तर-गुणोंमें विराधना करते हैं या नहीं, तीर्थ (शासन) में होते हैं या अतीर्थमें, वेश (साधु, गृहस्थ वेश आदि) कैसा होता है, लेश्यायें

तीर्थे भवन्ति अतीर्थे वा, कस्मिन् लिङ्गे वेषे भवन्ति, कस्मिन् स्थाने उपपातः—उत्पत्तिः, कतिसंयमस्थानानि इत्यादि ।

योगवर्गणान्तर्गतद्रव्यसाचिव्यादात्मपरिणामो लेश्या ॥१७॥

मनोवाक्कायवर्गणापुद्गलद्रव्यसंयोगात् संभूतः आत्मनः परिणामः लेश्याऽभिधीयते ।

उक्तञ्च—

कृष्णादिद्रव्यसाचिव्यात् परिणामोऽयमात्मनः ।
स्फटिकस्येव तत्रायं लेश्या शब्दः प्रवर्तते ॥

तत्प्रायोग्यपुद्गलद्रव्यम्—द्रव्यलेश्या, क्वचिद् वर्णादिरपि ।

कृष्णनीलकापोततेजःपद्मशुक्लाः ॥१८॥

आद्यास्तिस्रोऽशुभाः पराश्च शुभाः ।

स्त्रीपुंनपुंसकानामन्योन्यं विकारो वेदः ॥१९॥

वेदमोहोदयात् स्त्रीपुंनपुंसकानामन्योन्याभिलापरूपो विकारः—स्त्रीवेदः, पुंवेदः, नपुंसकवेदः क्रमेण करीषतृणेष्टिकाग्निसमानः । असौ नवमगुणस्थानं[1] यावत्, षष्ठगुणस्थानात् परतः प्रदेशवेद्य एव ।

अकेवली छद्मस्थः ॥२०॥

१—इदमादौ सवेदम्, अन्ते चावेदम् ।

कितनी होती हैं, किन स्थानोंमें उत्पन्न होते हैं और संयमके स्थान, —प्रकार कितने होते हैं।

१७—योगवर्गणाके अन्तर्गत पुद्गलोंकी सहायतासे होनेवाले आत्म-परिणामको लेश्या कहते हैं।

जैसे "कृष्ण आदि छः प्रकारके पुद्गलद्रव्योंके सहयोगसे स्फटिक के परिणमनकी तरह होनेवाला आत्म परिणाम लेश्या है।" भाव लेश्याओंके योग्य पुद्गलोंको और कहीं कहीं वर्ण आदिको भी द्रव्य लेश्या कहते हैं।

१८—लेश्यायें छः हैं—कृष्ण, नील, कापोत, तेजः, पद्म और शुक्ल।

पहली तीन अशुभ हैं और शेष तीन शुभ।

१९—स्त्री, पुरुष और नपुंसकोंकी जो पारस्परिक अभिलाषा—विकार होता है, उसे वेद कहते हैं।

पुरुषके प्रति स्त्रीका विकार होता है, उसे स्त्रीवेद, स्त्रीके प्रति पुरुषका विकार होता है, उसे पुरुषवेद और इन दोनोंके प्रति नपुंसकका विकार होता है, उसे नपुंसकवेद कहते हैं। इनका विकार क्रमशः करीष (कंडे), तृण एवं ईंटकी आगके समान होता है, यह नवम गुणस्थान तक होता है। छठे गुणस्थानके आगे सिर्फ प्रदेशवेद्य होता है।

२०—अकेवलीको छद्मस्थ कहते हैं।

घातिकर्मके उदयका नाम छद्म है। इस अवस्थामें रहनेवालेको

घातिकर्मोदयः—छद्म, तत्र तिष्ठतीति छद्मस्थः, द्वादशगुणस्थान-पर्यन्तवर्ती।

अकषायो वीतरागः ॥२१॥

स च उपशान्तकषायः क्षीणकषायो वा भवति। अयमत्र भावः—अष्टम-गुणस्थानादग्रे जिगमिषूणां द्वयी गतिः—उपशमश्रेणी क्षपकश्रेणी च। तत्र उपशमश्रेण्यारूढो मुनिर्मोहकर्मप्रकृतीरुपशमयन् एकादशे सर्वथा उपशान्त-मोहो भवति। क्षपकश्रेण्यारूढश्च ताः[1] क्षपयन् द्वादशे सर्वथा क्षीणमोहो भवति। उपशमश्रेणिमान् स्वाभावात् प्रतिपात्येव द्वितीयस्तु अप्रतिपाती।

ईर्यापथिकस्तस्य बन्धः ॥२२॥

ईरणम्—ईर्या—गतिः, उपलक्षणत्वात् योगः, पन्था—मार्गो यस्य बन्धस्य स ईर्यापथिकः। अयञ्च सातवेदनीयरूपो, योगमात्रनिमित्तो, द्विसमयस्थितिको भवति।

सांपरायिकः शेषस्य ॥२३॥

सकषायस्य शुभाशुभकर्मबन्धः सांपरायिक उच्यते, स च सप्तकर्मणामान-

---

१—मोहकर्मप्रकृतीः

छद्मस्थ कहते हैं। यह अवस्था बारहवें गुणस्थान तक रहती है।

२१—कषाय रहित आत्माको वीतराग कहते हैं।

वीतराग दो प्रकारके होते हैं—उपशान्तकषाय और क्षीण-कषाय। आठवें गुणस्थानसे आगे जानेवालोंके लिए दो मार्ग होते हैं—उपशम श्रेणी और क्षपक श्रेणी। उपशम श्रेणीमें आरूढ होनेवाला मुनि मोहकर्मको उपशान्त करता हुआ ग्यारहवें गुणस्थानमें मोहको सर्वथा उपशान्त कर देता है—उपशान्तमोह हो जाता है और क्षपक श्रेणीमें आरूढ होनेवाला मोह कर्मको खपाता हुआ बारहवें गुणस्थानमें मोहकर्मको निर्मूल कर देता है—क्षीणमोह हो जाता है। उपशम श्रेणीवाला मुनि उससे आगे नहीं जा सकता। वहींसे नीचेके गुणस्थानोंमें आ जाता है, क्षपक श्रेणीवाला क्रमशः आगे बढ़ता हुआ उसी भवमें मोक्ष प्राप्त कर लेता है।

२२—वीतरागके जो कर्मबन्ध होता है, उसे ईर्यापथिक कहते हैं।

जिस बन्धनका मार्ग गति (योग) होता है, उसका नाम ईर्या-पथिक है—यह ईर्यापथिकका शाब्दिक अर्थ है। ईर्यापथिक बन्ध सात वेदनीयका ही होता है। इसका हेतु एकमात्र योग ही है और उसका कालमान दो समयका होता है।

२३—कषाययुक्त आत्माओंके जो शुभाशुभ कर्मबन्ध होता है, उसे साम्परायिक बन्ध कहते हैं।

नवमें गुणस्थान तक सात कर्मोंका बन्ध होता है और आयुष्य

वमगुणस्थानम्, आयुर्बन्धकाले तृतीयवर्जमासप्तममष्टकर्मणामपि, आयुर्मोहौ विना षट्कर्मणां च दशमे ।

अबन्धोऽयोगी ॥२४॥

शैलेश्यवस्थायां चतुर्दशगुणस्थाने निरुद्धमनोवाक्काययोगः अयोगी, स च सर्वथा बन्धरहितत्वात् अबन्धो भवति ।

सशरीरः संसारी ॥२५॥

चतुर्दशगुणस्थानं यावत् ।

सुखदुःखानुभवसाधनं शरीरम् ॥२६॥

औदारिकादितत्तद्वर्गणाजन्यत्वेन प्रतिक्षणं शीर्यत इति शरीरम् ।

औदारिकवैक्रियाहारकतैजसकार्मणानि ॥२७॥

तत्र स्थूलपुद्गलनिष्पन्नम्, रसादिधातुमयम्—औदारिकम्, मनुष्यतिरश्चाम् । विविधरूपकरणसमर्थम्—वैक्रियम्, नारकदेवानाम्, वैक्रियलब्धिमतां नरतिरश्चां वायुकायिकानाञ्च । आहारकलब्धिनिष्पन्नम्—आहारकम्, चतुर्दशपूर्वधराणाम् । तेजोलब्धिनिमित्तं दीप्तिपाचननिमित्तञ्च तैजसम् । कर्मणां समूहस्तद्विकारो वा कार्मणम्, एते च सर्वसंसारिणाम् ।

बन्धके समय तीसरे गुणस्थानको छोड़कर सातवें गुणस्थान तक आठ कर्मोंका बन्ध होता है तथा दसवें गुणस्थानमें आयुष्य और मोहकर्मको छोड़कर शेष छः कर्मोंका बंध होता है।

२४—अयोगीके कर्मबन्ध नहीं होता है।

शैलेशी अवस्था—चौदहवें गुणस्थानमें जब मन, वचन और काय योगका निरोध हो जाता है, तब उसे अयोगी कहते हैं।

२५—शरीरवाले जीवोंको संसारी कहते हैं।

संसारी चौदहवें गुणस्थान तक होता है।

२६—जिसके द्वारा पौद्गलिक सुख-दुःखका अनुभव किया जाता है, उसे शरीर कहते हैं।

औदारिक आदि वर्गणाओंसे उत्पन्न होनेके कारण जो प्रतिक्षण शीर्ण होता है (सड़ता है), उसका नाम शरीर है—यह शरीरका शाब्दिक अर्थ है।

२७—शरीर पांच प्रकारके होते हैं—औदारिक, वैक्रिय, आहारक, तैजस और कार्मण।

स्थूल पुद्गलोंसे निष्पन्न एवं रस आदि धातुमय शरीरको औदारिक कहते हैं—यह मनुष्य और तिर्यञ्चोंके होता है। जो भांति-भांतिके रूप करनेमें समर्थ हो, उसे वैक्रिय कहते हैं, यह नारक, देव, वैक्रियलब्धिवाले[1] मनुष्य और तिर्यञ्च तथा वायु-

---

१—जिसके द्वारा मन-इच्छित विक्रिया की जा सके यानी इच्छानुकूल शरीर, उसकी आकृतियां या अन्य वस्तुएं बनाई जा सकें, उस आत्मशक्तिका नाम वैक्रियलब्धि है।

उत्तरोत्तरं सूक्ष्माणि पुद्गलपरिमाणतश्चासंख्येयगुणानि ॥२८॥

तैजसकार्मणे त्वनन्तगुणे ॥२९॥

एते चान्तरालगतावपि ॥३०॥

द्विविधा च सा—ऋजुर्विग्रहा च। तत्रैकसामयिकी ऋजुः, चतुःसमयपर्यन्ता च विग्रहा। तत्रापि द्विसामयिकमनाहारकत्वम्। अनाहारकावस्थायां च कार्मणयोग एव।

कायके होता है। आहारक[1]लब्धिसे निष्पन्न शरीरको आहारक कहते हैं। यह चतुर्दश-पूर्वधर[2] मुनिके होता है। जिससे तेजो[3]-लब्धि मिले और दीप्ति एवं पाचन हो उसे तैजस शरीर कहते हैं। कर्मसमूहसे निष्पन्न अथवा कर्मविकारको कार्मण शरीर कहते हैं। ये दोनों सब संसारी जीवोंके होते हैं।

२८—पांचों शरीर उत्तरोत्तर सूक्ष्म और प्रदेश (स्कन्ध) परिमाणसे असंख्य गुण होते हैं।

२९—तैजस और कार्मण प्रदेश परिमाणसे अनन्त गुण होते हैं।

३०—तैजस और कार्मण दोनों अन्तराल (दूसरे जन्ममें जानेके समय बीचकी गति) में भी होते हैं।

अन्तराल गति दो प्रकारकी होती है—ऋजु और विग्रह। जिस गतिमें एक समय लगे, उसे ऋजु और जिसमें दो, तीन एवं चार समय लगे, उसे विग्रहगति कहते हैं। विग्रहगतिमें दो समय तक अनाहारक अवस्था रहती है और अनाहारक अवस्थामें सिर्फ एक कार्मणयोग ही रहता है।

१—जिसके द्वारा चतुर्दशपूर्वधर मुनि एक हाथके पुतलेका निर्माण करते हैं, उसे केवलीके पास भेजकर अपने प्रश्नोंका उत्तर मंगवाते हैं, उस आत्मशक्तिका नाम आहारकलब्धि है।

२—जैन साहित्यमें मुख्य बारह अंग हैं। उनमें दृष्टिवाद बारहवां अंग है। वह सबसे अधिक विशाल है। चवदह पूर्वकी विशाल ज्ञानराशि उसीके अन्तर्गत है।

३—जिसके द्वारा उपघात या अनुग्रह किया जा सके उस शक्तिका नाम तेजोलब्धि है।

औपपातिकचरमशरीरोत्तमपुरुषाऽसंख्येयवर्षायुषो निरुपक्रमायुषः ॥३१॥

उपक्रमोऽपवर्तनमल्पीकरणमित्यर्थः। निबिडबन्धनिमित्तत्वात् तद्रहितायुषो निरुपक्रमायुषः। तत्रौपपातिकाः—नारकदेवाः। चरमशरीरास्तद्भवमुक्तिगामिनः। उत्तमपुरुषाश्चक्रवर्त्यादयः। असंख्यवर्षायुषो—यौगलिका नरास्तिर्यञ्चश्च।

शेषाः सोपक्रमायुषोऽपि ॥३२॥

अध्यवसाननिमित्ताहारवेदनापराघातस्पर्शोच्छ्वासनिश्वासाउपक्रमकारणानि ॥३३॥

अध्यवसानम्—रागस्नेहभयात्मकोऽध्यवसायः। निमित्तम्—दण्डशस्त्रादि। आहारः—न्यूनोऽधिको वा। वेदना नयनादिपीडा। पराघातः—गर्त्तपातादिः। स्पर्शः भुजङ्गादीनाम्। उच्छ्वासनिःश्वासौ—व्याधिरूपेण निरुद्धौ।

वेदनादिभिरेकीभावेनात्मप्रदेशानां तत इतः प्रक्षेपणं समुद्घातः[1] ॥३४॥

१—सम् इति एकीभावेन, उद् प्राबल्येन, घात इति हन्तेर्गत्यर्थकत्वात् आत्मप्रदेशानां बहिर्निस्सरणम्, हिंसार्थकत्वाच्च कर्मपुद्गलानां निर्जरणं समुद्घातः।

३१—औपपातिक, चरमशरीरी, उत्तम पुरुष और असंख्य वर्षकी आयुवाले निरुपक्रमायु होते हैं।

उपक्रमका अर्थ है—अपवर्तन या अल्पीकरण। जिनकी आयु गाढ बंधनसे बंधी हुई होनेके कारण उपक्रम रहित होती है, उन्हें निरुपक्रमायु कहते हैं। नारक और देव औपपतिक होते हैं। उसी भवमें मोक्ष जानेवालेको चरमशरीरी कहते हैं। चक्रवर्ती आदि उत्तम पुरुष कहलाते हैं। यौगलिक मनुष्य एवं यौगलिक तिर्यञ्च असंख्य वर्षजीवी होते हैं।

३२—शेष सब जीवोंका आयुष्य सोपक्रम और निरुपक्रम दोनों प्रकारका होता है।

३३—उपक्रमके सात कारण होते हैं—अध्यवसान, निमित्त, आहार, वेदना, पराघात, स्पर्श और उच्छ्‌वास-निःश्वास।

राग-स्नेह-भयात्मक विचारोंको अध्यवसान कहते हैं। दण्ड, शस्त्र आदिके प्रहारको निमित्त कहते हैं। आहारसे अर्थ है—अति कम भोजन करना या अधिक मात्रामें करना। वेदनाका अर्थ है—नयन आदिकी पीड़ा। पराघातका अर्थ है—गड्ढे आदिमें गिरना। स्पर्श—सांप आदिसे डसा जाना। उच्छ्‌वास-निःश्वासका रुक जाना।

३४—वेदना आदिमें घुल-मिल (तन्मय) होकर आत्मप्रदेशोंके इधर-उधर प्रक्षेप करनेको समुद्‌घात[1] कहते हैं।

१—समुद्‌घात शब्द सम्, उद् और घात, इन तीन शब्दोंके योगसे बना है। सम्‌का अर्थ है एकीभाव, उद्‌का अर्थ है प्रबलता और घातके

वेदनाकषायमारणान्तिकवैक्रियाहारकतैजसकेवलानि ॥३५॥

असद्वेद्यकर्माश्रयः—वेदना। कषायमोहकर्माश्रयः—कषायः। अन्तर्मुहूर्त्तशेषायुःकर्माश्रयः—मारणान्तिकः। वैक्रियाहारकतैजसनामकर्माश्रयाः—वैक्रियाहारकतैजसाः। आयुर्वर्जाऽघातिकर्माश्रयम्—केवलम्। सर्वेष्वपि समुद्घातेषु आत्मप्रदेशाः शरीराद् बहिर्निस्सरन्ति, तत्तत्कर्मपुद्गलानां विशेषपरिशाटश्च भवति। केवलसमुद्घाते चात्मा सर्वलोकव्यापी भवति, स चाष्टसामयिकः। तत्र च केवली प्राक्तने समयचतुष्टये आत्मप्रदेशान् बहिर्निस्सार्य क्रमेण दण्डकपाटमन्थानान्तरावगाहं कृत्वा समग्रमपि लोकाकाशं पूरयति। अग्रेतने च समयचतुष्टये क्रमेण तान् संहरन् देहस्थितो भवति। अष्टसमयेषु प्रथमेऽष्टमे च औदारिकयोगः, द्वितीये षष्ठे सप्तमे च औदारिकमिश्रः, तृतीये चतुर्थे पञ्चमे च कार्मणम्।

३५—समुद्घात सात प्रकारके होते हैं—वेदना, कषाय, मारणान्तिक, वैक्रिय, आहारक, तैजस और केवली।

वेदना समुद्घात असातवेदनीय कर्मके आश्रित होता है। कषाय समुद्घात कषाय मोहकर्मके आश्रित होता है। मारणान्तिक समुद्घात अवशिष्ट अन्तर्मुहूर्त्त आयुष्य कर्मके आश्रित होता है। वैक्रिय, आहारक और तैजस समुद्घात क्रमशः वैक्रिय, आहारक और तैजस नामकर्मके आश्रित होते हैं। केवलिसमुद्घात आयुष्यके सिवाय शेष तीन अघाति कर्मोंके आश्रित होता है। सब समुद्घातोंमें आत्मप्रदेश शरीरसे बाहर निकलते हैं और उनसे सम्बन्धित कर्मपुद्गलोंका विशेष रूपसे परिशाटन होता है। केवलि-समुद्घातके समय आत्मा समूचे लोकमें व्याप्त होती है। उसका कालमान आठ समयका है। केवलि-समुद्घात[1] के समय

दो अर्थ होते हैं—हिंसा करना एवं जाना। सामूहिकरूपसे बलपूर्वक आत्मप्रदेशोंको शरीरसे बाहर निकालना या उनका इतस्ततः विक्षेपण करना अथवा कर्म-पुद्गलोंका निर्जरण करना, समुद्घात का शाब्दिक अर्थ है।

१—समुद्घातके पहिले क्षणमें केवलीके आत्म-प्रदेश लोकके अन्त तक ऊर्ध्व और अधो दिशाकी तरफ फैल जाते हैं; उनका विष्कंभ (चौड़ाई) शरीरप्रमाण होता है, इसलिए उनका आकार दण्ड जैसा बन जाता है। दूसरे समयमें वे ही प्रदेश चौड़े होकर लोकके अन्त तक जाकर कपाटाकार बन जाते हैं। तीसरे समयमें वे प्रदेश वात वलयके सिवाय समूचे लोकमें फैल जाते हैं, इसे मन्थान कहते हैं। चौथे समयमें वे प्रदेश पूर्ण लोकमें फैल जाते हैं। इस अवस्थामें आत्मा लोकव्यापी बन जाती है। केवलि-समुद्घात वेदनीय और आयु कर्मकी स्थितिको समान करनेके लिए होता है।

इतिश्री तुलसीगणिसंकलितायां श्रीजैनसिद्धान्तदीपिकायां गुणस्थानस्व-
रूपनिर्णयो नामाऽष्टमः प्रकाशः।

केवली समस्त आत्मप्रदेशोंको फैलाता हुआ चार समयमें क्रमशः दण्ड, कपाट, मन्थान और अन्तरावगाह (कोणोंको स्पर्श कर) कर समग्र लोकाकाशको उनसे पूर्ण कर देता है और अगले चार समयों में क्रमशः उन आत्मप्रदेशोंको समेटता हुआ पूर्ववत् देहस्थित हो जाता है। इन आठ समयोंमें पहले और आठवें समयमें औदारिक योग; दूसरे, छठे और सातवें समयमें औदारिकमिश्रयोग तथा तीसरे, चौथे और पांचवें समयमें कार्मण योग होता है।

इतिश्री तुलसीगणिविरचित श्रीजैनसिद्धान्तदीपिकाका गुणस्थानस्वरूप-निरूपण नामक आठवां प्रकाश समाप्त।

नवमः प्रकाशः

यथार्थनिर्णायिज्ञानं प्रमाणम् ॥१॥

संशयादिराहित्येन यथार्थं निर्णयते इत्येवंशीलं ज्ञानं प्रमाणम् ।

प्रत्यक्षं परोक्षं च ॥२॥

स्पष्टं प्रत्यक्षम् ॥३॥

पारमार्थिकं सांव्यवहारिकञ्च ॥४॥

आत्ममात्रापेक्षत्वेन केवलज्ञानं पारमार्थिकम् ॥५॥

विकलश्चावधिमनःपर्यायावपि ॥६॥

इन्द्रियमनोऽपेक्षमवग्रहादिरूपं सांव्यवहारिकम्[1] ॥७॥

१—व्यवहारप्रत्यक्षम्

नवम प्रकाश

१—यथार्थनिर्णायि ज्ञानको प्रमाण कहते हैं (संशय, विपर्यय और अनध्यवसाय रहित)

२—प्रमाण दो प्रकारके होते हैं—प्रत्यक्ष और परोक्ष।

३—स्पष्टतया निर्णय करनेवाले ज्ञानको प्रत्यक्ष[1] कहते हैं।

४—प्रत्यक्षके दो भेद हैं—पारमार्थिक और सांव्यवहारिक।

५—केवल-ज्ञान पारमार्थिक प्रत्यक्ष है क्योंकि वह इन्द्रिय आदि साधनोंकी सहायताके बिना सिर्फ आत्मासे होता है।

६—अवधि और मनःपर्याय विकल[2] पारमार्थिक प्रत्यक्ष होते हैं।

७—इन्द्रिय और मनकी सहायतासे निर्णय करनेवाले अवग्रह[3] आदि ज्ञानको सांव्यवहारिक प्रत्यक्ष कहते हैं।

१—इससे पदार्थका स्पष्ट प्रतिभास होता है।

२—अवधि और मनः पर्यायमें पारमार्थिक प्रत्यक्षका लक्षण पूर्ण घटित होता है फिर भी सब पर्यायोंको नहीं जान सकते इसलिए उन्हें विकल यानी अपूर्ण पारमार्थिक प्रत्यक्ष कहा जाता है।

३—अवग्रह आदिका ज्ञान वास्तवमें प्रत्यक्ष नहीं है किन्तु अन्य ज्ञानोंकी अपेक्षा कुछ स्पष्ट होनेसे लोक व्यवहारमें उन्हें प्रत्यक्ष माना जाता है।

अस्पष्टं परोक्षम् ॥८॥

मतिश्रुते ॥९॥

स्मृतिप्रत्यभिज्ञातर्कानुमानागमाश्च ॥१०॥

संस्कारोद्बोधजास्तदित्याकारा स्मृतिः ॥११॥

यथा स जलाशयः ।

स एवायमित्यादिसंकलनात्मकं ज्ञानं प्रत्यभिज्ञा ॥१२॥

व्याप्तिज्ञानं तर्कः ॥१३॥

साध्यसाधनयोर्नित्यसम्बन्धः व्याप्तिः । यथा—यत्र यत्र धूमस्तत्र तत्र वह्निः ।

साधनात् साध्यज्ञानमनुमानम् ॥१४॥

साधयितुं योग्यं साध्यम् । निश्चितसाध्याऽविनाभाविसाधनम् । यथा—पर्वतोऽयं वह्निमान् धूमात् ।

आप्तवचनादर्थज्ञानमागमः ॥१५॥

यथावस्थितवस्तुविद् तथोपदेशकश्च आप्तः ।

८—अस्पष्टतया निर्णय करनेवाले ज्ञानको परोक्ष कहते हैं।

९—परोक्ष दो प्रकारका होता है—मति और श्रुत।

१०—अथवा परोक्षके पांच भेद हैं—स्मृति, प्रत्यभिज्ञा, तर्क, अनुमान और आगम।

११—संस्कारके जागरणसे 'वह' इस प्रकारका जो ज्ञान होता है—अनुभूत विषयंका स्मरण होता है, उसे स्मृति कहते हैं।

'वह जलाशय,' यह पूर्ण अनुभव किये हुए जलाशयकी याद है।

१२—'यह वही है' इत्यादि रूपमें होनेवाले संकलनात्मक—जोड़रूप ज्ञानको प्रत्यभिज्ञा कहते हैं।

१३—व्याप्ति-ज्ञानको तर्क कहते हैं।

साध्य और साधनके नित्य सम्बन्धको व्याप्ति कहते हैं, जैसे—जहां-जहां धुआं (साधन) होता है, वहां-वहां अग्नि (साध्य) होती है। जिस ज्ञानसे इस सम्बन्धका निश्चय होता है, उसे तर्क कहते हैं।

१४—साधनसे साध्यका ज्ञान होता है, उसे अनुमान कहते हैं।

जो साधनेके योग्य होता है, उसे साध्य कहते हैं, साध्यके बिना जो निश्चितरूपसे न हो सके, उसे साधन कहते हैं। जैसे—यह पर्वत अग्निमान् है क्योंकि यहां धुआं है।

१५—आप्त वचनसे जो अर्थ-ज्ञान होता है, उसे आगम कहते हैं।

यथार्थ तत्त्वोंको जाननेवाला और उनका यथार्थ उपदेश करनेवाला आप्त होता है।

प्रश्नवशादेकस्मिन् वस्तुन्यविरोधेन स्याच्छाङ्कता
विधिनिषेधकल्पना सप्तभङ्गी ॥१६॥

यथा स्यादस्त्येव घटः। स्यान्नास्त्येव घटः। स्यादस्त्येव, स्यान्नास्त्येव घटः। स्यादवक्तव्यमेव घटः। स्यादस्त्येव, स्यादवक्तव्यमेव घटः। स्यान्नास्त्येव, स्यादवक्तव्यमेव घटः। स्यादस्त्येव, स्यान्नास्त्येव, स्यादवक्तव्यमेव घटः।

अनिराकृतेतरांशो वस्त्वंशग्राही ज्ञातुरभिप्रायो नयः ॥१७॥

वस्त्वंशग्राहित्वात् नासौ प्रमाणं नचाप्रमाणं किन्तु प्रमाणांश उच्यते।

नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवं भूताः ॥१८॥

संकल्पग्राही नैगमः ॥१६॥

निगमः देशः संकल्प उपचारो वा तत्र भवो नैगमः।

सामान्यग्राही संग्रहः ॥२०॥

तत्र सत्तामात्रग्राही परः। यथा—विश्वमेकं सतोऽविशेषात्। द्रव्यत्वाद्यवान्तरसामान्यग्राही अपरः। यथा धर्मादीनां षड्द्रव्याणामैक्यं द्रव्यत्वाविशेषात्।

१६—प्रश्नकर्त्ताके अनुरोधसे एक वस्तुमें अविरोध रूपसे 'स्यात्' शब्द युक्त जो विधि-निषेधकी कल्पनाकी जाती है, उसे सप्तभंगी कहते हैं।

जैसे कथञ्चित् घट है। कथञ्चित् घट नहीं है। कथञ्चित् घट है और कथञ्चित् घट नहीं है। कथञ्चित् घट अवक्तव्य है। घट कथञ्चित् है और कथञ्चित् अवक्तव्य है। घट कथञ्चित् नहीं है और कथञ्चित् अवक्तव्य है। घट कथञ्चित् है, कथञ्चित् नहीं है और कथञ्चित् अवक्तव्य है।

१७—वस्तुके किसी एक अंशको जाननेवाले और अन्य अंशोका खण्डन न करनेवाले ज्ञाताके अभिप्रायको नय कहते हैं।

नय वस्तुके अंशको ग्रहण करता है, इसलिए वह न तो प्रमाण होता है और न अप्रमाण किन्तु प्रमाणका अंश होता है।

१८—नय सात हैं—नैगम, संग्रह, व्यवहार, ऋजुसूत्र, शब्द, समभिरूढ और एवंभूत।

१९—ज्ञाताके संकल्पग्राही अभिप्रायको नैगम नय कहते हैं।

निगम शब्दका अर्थ है—देश, संकल्प और उपचार। इनमें होनेवाले अभिप्रायको नैगम कहते हैं।

२०—सामान्यमात्रको ग्रहण करनेवाले विचारको संग्रह नय कहते हैं।

संग्रह नयके दो भेद होते हैं—पर और अपर। सत्तामात्रको ग्रहण करनेवाले विचारको पर संग्रह कहते हैं, जैसे—विश्व एक है क्योंकि सत्ता सबमें एकरूपसे विद्यमान है। द्रव्यत्व आदि अवा-

संगृहीतार्थानां यथाविधिविभेदको व्यवहारः ॥२१॥

यथा—यत्सत्, तत् द्रव्यं पर्यायो वा ।

वर्त्तमानपर्यायग्राही ऋजुसूत्रः ॥२२॥

यथा—सुखमयोऽयं समयः ।

कालादिभेदेनार्थकृच्छब्दः ॥ २३ ॥

यथा—बभूव, भवति, भविष्यति, सुमेरुरिति भिन्नकालाः शब्दा, भिन्नार्थस्य बोधकाः ।

पर्यायैरर्थभेदकृत् समभिरूढः ॥ २४ ॥

यथा—इन्दनात्—इन्द्रः, शकनात्—शक्रः ।

क्रियापरिणतमर्थं तच्छब्दवाच्यं स्वीकुर्वन्नेवम्भूतः ॥ २५ ॥

यथा—इन्दनक्रियापरिणत इन्द्रः । एष्वाद्यास्त्रयो द्रव्यार्थिकाः शेषाश्च

न्तर सामान्योंको ग्रहण करनेवाले विचारको अपर संग्रह कहते हैं, जैसे धर्मास्तिकाय आदि छओं द्रव्य एक द्रव्य हैं क्योंकि इन सबमें द्रव्यत्व साधारणतया विद्यमान है।

२१—संग्रह नयके द्वारा एकत्रित किये हुए अर्थका विधिपूर्वक विभाग करनेवाले विचारको व्यवहारनय कहते हैं।

व्यवहार नय सामान्यकी उपेक्षा कर प्रत्येक वस्तुका विभाग करता है। जैसे सत् दो प्रकारका होता है—द्रव्य और पर्याय।

२२—वर्तमान पर्यायको ग्रहण करनेवाले विचारको ऋजुसूत्र नय कहते हैं।

जैसे—वर्तमानमें सुख है।

२३—काल आदिके भेदसे अर्थ-भेद माननेवाले विचारको शब्द नय कहते हैं।

जैसे—सुमेरु था, है और होगा। ये भिन्न-भिन्न कालवाची शब्द भिन्न-भिन्न अर्थोंके बोधक हैं।

२४—पर्यायवाची शब्दोंके द्वारा अर्थ-भेद माननेवाले विचारको समभिरूढ नय कहते हैं।

जैसे—इन्दन—दीप्तिवाला इन्द्र होता है। जो समर्थ हो, वह शक्र है।

२५—क्रिया परिणत अर्थको उसी शब्दके द्वारा कहनेवाले विचारको एवंभूत नय कहते हैं।

पर्यायार्थिकाः ।

निश्चयो व्यवहारश्चापि ॥ २६ ॥

नात्त्विकार्थाभिधायी निश्चयः । यथा—भ्रमरः पञ्चवर्णः । लोकप्रतीनार्थाम्नायी व्यवहारः । यथा—भ्रमरः कृष्णवर्णः ।

द्रव्यपर्यायात्मकं वस्तु प्रमेयम् ॥ २७ ॥

प्रमाणविषय इति यावत् ।

सामान्यविशेषसदसन्नित्यानित्यवाच्याऽवाच्याद्यनेकान्तात्मकम् ॥ २८ ॥

तुल्या प्रतीतिः सामान्यम् ॥ २६ ॥

भिन्ना प्रतीतिर्विशेषः ॥ ३० ॥

उत्पादव्ययध्रौव्यात्मकं सत् ॥ ३१ ॥

तदितरदसत् ॥ ३२ ॥

सतोऽप्रच्युतिर्नित्यम् ॥ ३३ ॥

परिणमनमनित्यम् ॥ ३४ ॥

वाग्गोचरं वाच्यम् ॥ ३५ ॥

वागविषयमवाच्यम् ॥ ३६ ॥

जैसे—इन्द्र वह होता है, जो इन्दन क्रियामें परिणत हो—देदीप्यमान.हो। इनमें पहले तीन नय द्रव्यार्थिक और अन्तिम चार पर्यार्थिक हैं।

२६—अथवा नयके दो प्रकार हैं—निश्चय नय और व्यवहार नय।

तात्त्विक अर्थका कथन करनेवाले विचारको निश्चय नय कहते हैं; जैसे—भौंरा पांच वर्णवाला है। लोक प्रसिद्ध अर्थको माननेवाले विचारको व्यवहार नय कहते हैं; जैसे—भौंरा काला है।

२७—द्रव्यपर्यायात्मक वस्तुको प्रमेय (प्रमाणका विषय) कहते हैं।

२८—सामान्य, विशेष, सत्, असत्, नित्य, अनित्य, वाच्य, अवाच्य आदि अनेक धर्मयुक्त होनेके कारण वस्तु अनेकान्तात्मक होती है।

२९—तुल्य (एक है) ऐसी प्रतीतिको सामान्य कहते हैं।

३०—भिन्न (पृथक्-पृथक् है), ऐसी प्रतीतिको विशेष कहते हैं।

३१—उत्पाद, व्यय और ध्रौव्यात्मक स्वरूपको सत् कहते हैं।

३२—जिसमें उत्पाद, व्यय एवं ध्रौव्य न हो, उसे असत् कहते हैं।

३३—सत्की अप्रच्युति—नष्ट न होनेको नित्य कहते हैं।

३४—परिणमनको अनित्य कहते हैं।

३५—जो कहा जा सके, उसे वाच्य कहते हैं।

३६—जो न कहा जा सके, उसे अवाच्य कहते हैं।

अपेक्षाभेदादेकत्र संगतिः ॥ ३७ ॥

नहि येन रूपेण सामान्यं तेनैव रूपेण विशेषः, किन्तु अपेक्षाभेदेनेति सर्वत्र गम्यम् ।

फलमज्ञाननिवृत्तिरर्थप्रकाशो वा ॥ ३८ ॥

प्रमितिरित्यस्य पर्यायः ।

हेयोपादेयोपेक्षा बुद्धयश्च ॥ ३९ ॥

तत्र केवलज्ञानस्य फलमुपेक्षा, शेषाणाञ्च तिस्रोऽपि । इदञ्च प्रमाणाद् भिन्नाभिन्नं प्रमाणफलत्वाऽन्यथानुपपत्तेः ।

प्रत्यक्षादिप्रसिद्ध आत्मा प्रमाता ॥ ४० ॥

पदार्थानां वाचकेषु भेदेनोपन्यासो निक्षेपः ॥ ४१ ॥

जीवादिपदार्थानां वाचकेषु यथोचितभेदेनोपन्यासः—निरूपणं निक्षेपः ।

३७—अपेक्षा-भेदसे इनके विरोधका परिहार होता है।

सामान्य, विशेष, सत्, असत्, आदि आपसमें विरोधीसे जान पड़ते हैं परन्तु अपेक्षाका प्रयोग करने पर इनमें कोई विरोध नहीं रहता अर्थात् वस्तु जिस रूपसे सामान्य मानी जाती है, उसी रूपसे विशेष नहीं किन्तु अपेक्षा भेदसे मानी जाती है, जैसे—जातिकी अपेक्षा वस्तु सामान्य और व्यक्तिकी अपेक्षा विशेष होती है।

३८—प्रमाणसे अज्ञानकी निवृत्ति होती है तथा अर्थका भान होता है, यह उसका फल (प्रमिति) है।

३९—हेय-बुद्धि, उपादेय-बुद्धि और उपेक्षा-बुद्धि यह भी प्रमाणका फल है।

केवल ज्ञानका फल उपेक्षा है और शेष प्रमाणोंका फल तीनों बुद्धियां हैं। प्रमाणका फल प्रमाणसे कथंचित् भिन्न और कथंचित् अभिन्न होता है क्योंकि ऐसा हुए विना प्रमाण और फलका या तो आपसमें कोई सम्बन्ध ही नहीं रहता या वे दो नहीं रह पाते।

४०—प्रत्यक्ष आदि प्रमाणसे प्रसिद्ध आत्माको प्रमाता कहते हैं।

४१—जीवादि पदार्थोंका वाचकोंमें यथोचित भेदसे आरोप करनेको निक्षेप कहते हैं।

निक्षेपका अर्थ है—आरोप करना। जीवादि पदार्थ वाच्य हैं और जीवादि शब्द वाचक। वाच्यका वाचकमें अथवा वाचकका वाच्यमें जो आरोप किया जाता है, उसे निक्षेप कहते हैं या यों समझिये कि जो शब्द और अर्थके सम्बन्धके स्थापनकी क्रिया है,

नामस्थापनाद्रव्यभावाः ॥ ४२ ॥

तदर्थनिरपेक्षं संज्ञाकर्म नाम ॥ ४३ ॥

यथा—कश्चिद् वीराभिधः—नामवीरः ।

तदर्थवियुक्तस्य तदभिप्रायेण प्रतिष्ठापनं स्थापना ॥ ४४ ॥

भूतभाविभावस्य कारणमनुपयोगो वा द्रव्यम् ॥ ४५ ॥

यथा—भूतो भावी वीरत्वानुपयुक्तो वा वीरः—द्रव्यवीरः ।

विवक्षितक्रियापरिणतो भावः ॥ ४६ ॥

यथा—वीरत्वपरिणतः—भाववीरः ।

वह निक्षेप है।

४२—निक्षेपके चार भेद हैं—नाम, स्थापना, द्रव्य और भाव।

४३—मूल शब्दके अर्थकी अपेक्षा न रखनेवाले संकेतकरणको नाम-निक्षेप कहते हैं।

जैसे—किसी कुलका नाम वीर है। वह वीर भगवान्का नाम-निक्षेप है—नाम वीर है।

४४—मूल अर्थसे रहित वस्तुको उसीके अभिप्रायसे स्थापित करना स्थापना-निक्षेप है।

जैसे—वीर भगवान्की प्रतिमा—स्थापना वीर है।

४५—भूत और भावी अवस्थाके कारण अथवा उपयोग शून्यको द्रव्य-निक्षेप कहते हैं।

जैसे—कोई वीर हुआ था होगा, वह द्रव्यवीर कहा जाता है अथवा जो वीर शब्दका अर्थ जानता है किन्तु उस पर जब ध्यान नहीं होता है तब वह द्रव्यवीर कहा जाता है।

४६—विवक्षित अर्थकी क्रियामें परिणत और उपयुक्तको भावनिक्षेप कहते हैं।

जैसे—जो वीरत्वकी क्रियायुक्त होता है, वह भाववीर है अथवा वीर शब्दका अर्थ जाननेवाला उसमें उपयुक्त हो, वह भाववीर है।

अप्रस्तुतार्थाऽपाकरणात्प्रस्तुत व्याकरणाच्च निक्षेपः फलवान् ॥ ४७ ॥

इतिश्रीतुलसीगणिसंकलितायां श्री जैन-सिद्धान्तदीपिकायां प्रमाण-नय-प्रमेय-प्रमातृ-निक्षेपस्वरूपनिर्णयो नाम नवमः प्रकाशः ।

प्रकाशैर्नवभिः स्पष्टैः, मिथ्याध्वान्तप्रणाशिभिः ।
तत्त्वज्योतिर्मयी जीयाज्जैनसिद्धान्तदीपिका ॥ १ ॥

४७—अप्रस्तुत अर्थको दूर कर प्रस्तुत अर्थको प्रगट करना यह निक्षेपका फल है।

इति श्रीतुलसीगणिविरचित जैनसिद्धान्तदीपिकाका प्रमाण-नय-प्रमेय-प्रमातृ-निक्षेप-स्वरूपनिर्णय नामक नौवां प्रकाश समाप्त।

अथ प्रशस्तिश्लोकाः

व्यपाकुर्वन्नुर्वीप्रथिततरमिथ्यामततपं,
चितन्वानः शैत्यं कलिकलुषसंतप्तहृदये।
चिदासारैः सिञ्चन् भविजनमनोभूतलमलं,
सतां शान्ति पुष्यात् सपदि जिनतत्त्वाम्बुदवरः ॥१॥

न विद्युद् यच्चिह्नं न च तत इतोऽभ्रे भ्रमति यो,
न सौवं सौभाग्यं प्रकटयितुमुच्चैः स्तनति च।
पराद् याञ्चावृत्त्या मलिनयति नाङ्गं क्वचिदपि,
सतां शान्ति पुष्यात् सपदि जिनतत्त्वाम्बुदवरः ॥२॥

न वर्षत्येवैव प्रतिपलमहो वर्षणपरः,
खरांशुं ह्याच्छाद्योद्गमयति ततो ज्ञानतरणिम्।
जवासाभान् जन्तूनपि सृजति प्रोत्फुल्लवदनान्,
सतां शान्ति पुष्यात् सपदि जिनतत्त्वाम्बुदवरः ॥३॥

जैनं मतं ह्युपकृतं सुतरां यकेन, स्वाचारशीलननिरूपणकौशलेन।
तेरापथाद्यपुरुषः प्रथितः पृथिव्यां, संस्मर्यते प्रतिपलं किल भिक्षुराजः ॥४॥

सप्ताचार्या भारमल्लादयो ये, शश्वद् ध्येया ध्येयबुद्ध्या स्वसिद्ध्यै।
तत्राप्यासन्नोपकारी ममेति, भूयो भूयो मूलसूनुं स्मरामि ॥५॥

विलोक्यमानः सकृपैः समस्तैः, प्राग्वर्तितेरापथपूज्यपादैः।
प्रतीक्ष्य भिक्षोर्नवमासनस्थो, रामोत्तरोऽहं तुलसी प्रणेता ॥६॥

आर्हन्त्यतत्त्वाङ्गणदीपिकायाः, श्रीजैनसिद्धान्तसुदीपिकायाः।
जिज्ञासुभावं भजतां नितान्तं, हिताय संक्षिप्तकृतिर्मदीया ॥७॥

अङ्क्रिगगनघनवर्त्म, दृष्टियुतेऽब्दे सुमाधवे मासे।
सम्पूर्णाऽसितपक्षे, चूरूपुर्यां त्रयोदशीदिवसे ॥८॥

यावन्मेरुर्धरामध्ये, व्योम्नि चन्द्रदिवाकरौ।
तावत्तेरापथाम्नाये, जैनसिद्धान्तदीपिका ॥९॥

परिशिष्ट : १ :

(क) तुलनात्मक टिप्पण

१—४ गमनप्रवृत्तानां.............।

गइपरिणयाण धम्मो, पुग्गल जीवाण गमण-सहयारी ।
तोयं जह मच्छाणं अच्छंताणेव सो णेई ।

द्रव्यसंग्रह गाथा १७

१—५ स्थान प्रवृत्तां ....।

ठाणजुदाण अधम्मो, पुग्गल जीवाण ठाण-सहयारी ।
छाया जह पहियाणं गच्छंताणेव सो धरई ।।

द्रव्यसंग्रह गाथा १८

१—८...............लोकः ।

धम्माधम्मा कालो, पुग्गल जीवाय संति जावदियें ।
आयासे सो लोगो, तत्तो परदो अलोगुत्तो ।।

द्रव्यसंग्रह गाथा २०

१—३० जीव............समावेशो न दुर्घटः ।

अवकाशे पदार्थानां, सर्वेषां हेतुतां दधत् ।
शर्कराणां दुग्धमिव, वह्नेर्लोहादिगोलवत् ।।
परमाणवादिना द्रव्ये-णैकेनापि प्रपूर्यते ।
स्वप्रदेशस्तथा द्वाभ्या-मपि ताभ्यां तथा त्रिभिः ।।

अपि द्रव्यशतं माया-त्तत्रैवैकप्रदेशके ।
मायात्कोटिशतं माया-दपि कोटि सहस्रकम् ॥
अवगाहस्वभावत्वात्, अंतरिक्षस्य तत्समम् ।
चित्रत्वाच्च पुद्गलानां, परिणामस्य युक्तिमत् ॥
दीप्तदीपप्रकाशेन, यथायंवरकोदरम् ।
एकेनापि पूर्यते तत्, शतमप्यत्र मातिच ॥
विशत्योपधसामर्थ्यात्, पारदस्यैककर्पके ।
सुवर्णस्य कर्पशतं, तौल्ये कर्पाधिकं न तत् ॥
पुनरोपधसामर्थ्या-त्तद्द्वयं जायते पृथक् ।
सुवर्णस्य कर्पशतं, पारदस्यैककर्पके ॥

लोकप्रकाश

२—३.............. उपयोगः ।

चित्तं चेतो योगो-ऽध्यवसानं चेतनापरिणामः ।
भावो मन इति चैते, ह्युपयोगार्था जगति शब्दाः ॥

२—२० मति..............अज्ञानम् ।

सम्यग्दृष्टेर्ज्ञानं, सम्यग्ज्ञानमिति नियमतः सिद्धम् ।
आद्यत्रयमज्ञान-मपि भवति मिथ्यात्वसंयुक्तम् ॥

प्रशमरतिप्रकरण २२७

२—३० अनिन्द्रियं..............।

यथा चक्षुरादीनि प्रतिनियतदेशावस्थानानि न तथा मन इत्यनीन्द्रियं तत् ।

तत्त्वार्थराजवार्तिक पृ० ९०

अनिन्द्रियं मनोऽभिधीयते रूपग्रहणादावस्वतन्त्रत्वादसम्पूर्ण-त्वादनुदराकन्यावत् इन्द्रियकार्याकरणाद् वाऽप्यपुत्रव्यपदेशवत् ।

तत्त्वार्थ वृहद् वृत्ति ।

३—५ वनस्पतिषु................ ।

से किं तं रुक्खा पण्णत्ता ? गोयमा ! तिविहा रुक्खा पण्णत्ता । तं जहा—संखेज्जजीविया, असंखेज्जजीविया, अणंत जीविया । से किं तं अणंत जीविया ? अणंत जीविया अणेग विहा पण्णत्ता । तं जहा—आलुए, मूलए, सिंगबेरे ।..............

से किं तं संखेज्जीविया ? गोयमा ! संखेज्जीविया अणेग विहा पण्णत्ता ।

ताले तमाले तक्कलि, तेतलि सालेय सालकल्लाणे ।
सरले जायइ केअइ, कंदलि तह चम्मरुक्खेय ॥१॥
भूयरुक्खे हिंगरुक्खे, लवंग रुक्खेय होइ बोद्धव्वे ।
पूयफली खज्जूरी, बोद्धव्वा नालिएरीय ॥२॥

जे यावण्णे तहप्प गारेति-ये चाप्यन्ये तथा प्रकारा वृक्षविशेषास्ते-संख्यातजीविका इति प्रक्रमः ।

भगवती श० ८ उ० ३

४—१४...धर्माविनाभावि ।

तथाह्यचरमांगस्य, ध्यानमभ्यस्तः सदा ।
निर्जरा संवरश्च स्यात्, सकलाशुभकर्मणाम् ॥
आस्रवन्ति च पुण्यानि, प्रचुराणि प्रतिक्षणम् ।
यैर्महद्र्भिर्भवत्येष, त्रिदशः कल्पवासिषु ॥

तत्त्वानुशासन २२५-२२६

४—२८ शुभयोग............ ।

योग : शुद्ध : पुण्या-स्रवस्तु पापस्य तद्विपर्यासः ।

प्रशमरति प्रकरण २२०

५—१४ मिथ्यात्विनांच .. .. ।

ये चरकपरिव्राजकादिमिथ्यादृष्टयोऽस्माकं कर्म्मक्षयो भवत्विति धिया तपश्चरणाद्यज्ञानकष्टं कुर्वन्ति तेषां तत्त्वार्थभाष्यवृत्तिसमयसारसूत्रवृत्तियोगशास्त्रवृत्यादि ग्रन्थानुसारेण सकामनिर्जरा भवतीति संभाव्यते, यतो योगशास्त्रचतुर्थप्रकाशवृत्तौ सकाम निर्ज्जराया हेतुर्बाह्याभ्यन्तरभेदेन द्विविधं तपः प्रोक्तम्, तत्र षट्प्रकारं बाह्यं तपो, बाह्यत्वं च बाह्यद्रव्यापेक्षत्वात्परप्रत्यक्षत्वात् कुतीर्थिकैर्गृहस्थैश्च कार्यत्वाच्चेति, तथा—लोकप्रतीतत्वात्कुतीर्थिकैश्च स्वाभिप्रायेणासेव्यत्वाद् बाह्यत्वमिति । त्रिशत्तमोत्तराध्ययनचतुर्दशसहस्त्रीवृत्तौ एतदनुसारेण षड्विधबाह्यतपसः कुतीर्थिकासेव्यत्वमुक्तं परं सम्यक्दृष्टिसकामनिर्ज्जरापेक्षया तेषां स्तोका भवति, यदुक्तं भगवत्यष्टमशतकदशमोद्देशके (देशाराहएत्ति) बाल तपस्वी स्तोकमंशं मोक्षमार्गस्याराधयतीत्यर्थः, सम्यग्बोधरहितत्वात्क्रियापरत्वाच्चेति, तया च मोक्षप्राप्तिर्नभवति स्तोककर्म्मांशनिर्ज्जरणात्, भवत्यपि च भावविशेषाद्वल्कलचीर्यादिवत्, यदुक्तम् ।

आसंबरो अ सेयंबरो अ, बुद्धो य अहवअन्नो वा ।
समभावभाविअ अप्पा, लहेइ मुक्खं न संदेहो ।।

....

...अणुकंप काम निज्जर-बाल तवेदाणविणयविब्भंगे ।
संजोगविप्पओगे, वसमूसव इड्ढि सक्कारे ।।

इत्यत्राकामनिर्ज्जराबालतपसोर्भेदद्वयभणनं व्यर्थमेव, एकेनाकाम-निर्ज्जरालक्षणेन चरितार्थत्वात्।

सेन प्रश्नोत्तर ४ उल्ला०

५—२८ एकाग्र………ध्यानम्।

अंतोमुहुत्तमित्तं, चित्तावत्थाण मेगवत्थुम्मि।
छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु॥

स्थानांग वृत्ति स्था० ४ उ० १ सू० २४७

५—४२ मुक्तस्य………लोकान्तात्।

अणुपुव्वेणं अट्ठकम्मपगडीओ खवेत्ता गगणतलमुप्पइत्ता उप्पि लोयग्गपतिट्ठाणा भवंति।

ज्ञाता अ० ६ सू० ६२

६—२ ………दया।

सा रक्खमाणे—जीवनिकायान् रक्षन् स्वतः परतश्च सदुपदेशदानतो नरकादिपाताद्वेति।

आचारांग ५-५-१६१

शृण्वन्ति येनैव हितोपदेशं, न धर्मलेशं मनसा स्पृशन्ति।
रुजः कथंकारमथापनेया—स्तेषामुपायस्त्वयमेक एव॥
परदुःखप्रतीकारमेवं ध्यायन्ति ये हृदि।
लभन्ते निर्विकारं ते, सुखमायति सुन्दरम्॥

शान्तसुधारस १५-६-७

६—६ बलप्रयोग……… ।

अर्हन्तोऽपि प्राज्यशक्तिस्पृशः किं,
धर्मोद्योगं कारयेयुः प्रसह्य।

दधुः शुद्धं किन्तु धर्मोपदेशं,

यत् कुर्वाणा दुस्तरं निस्तरंति ॥

शान्तसुधारस १६-४

६—१२ रागः ········· ।

रागः सांसारिकः स्नेहोऽनुग्रहलक्षणः ।

षड्दर्शनवृत्ति

७—२४ संवरो निर्जरा च ।

धर्मस्य कर्मानुपादाननिर्जरणलक्षणस्य साधनानि हेतवोऽहिंसादीनि, तानि लक्षणं स्वभावो यस्य स तथेति ।

हारिभद्रीय अष्टक १३

७—२६ शान्ति मुक्ति············ ।

पाशुपतैस्तु धर्मशब्देनोक्तानि । यतस्ते दशधर्मानाहुः । तद्यथा—

अहिंसा सत्यवचन-मस्तैन्यं चाप्य कल्पना ।

ब्रह्मचर्यं तथाऽक्रोधो, ह्यार्जवं शौचमेव च ॥

संतोषो गुरुशुश्रूषा, इत्येते दश कीर्तिताः ॥

बौद्धैः पुनरेताः कुशलधर्मा उक्ताः यदाहुस्ते—

दश कुशलानि । तद्यथा—

हिंसास्तैन्योऽन्यथाकामं, पैशून्यं परुषानृतम् ।

संभिन्नाऽलापं व्यापाद-मभिध्यां दृग्विपर्ययम् ॥

पापं कर्मेति दशधा, कायवाङ्मानसैस्त्यजेत् ॥

(अत्र च अन्यथाकामं पारदार्यम्, सभिन्नाऽलापोऽसंबद्धभाषणं,

व्यापादः परपीडाचिन्तनम् ।

अभिध्या धनादिष्वसंतोषः, परिग्रह इति तात्पर्यम् । दृग्विपर्ययो

मिथ्याभिनिवेश एतद्विपर्ययाश्च दशकुशलधर्मा भवन्तीति)
वैदिकैस्तु ब्रह्मशब्देनैतान्यभिहितानि ।

हारिभद्रीय अष्टक १३

८—३ ....मिथ्यादृष्टिः ।

यया धर्ममधर्मंच, कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति, बुद्धिः सा पार्थ ! राजसी ॥
अधर्मं धर्ममिति या, मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च, बुद्धिः सा पार्थ ! तामसी ॥

गीता अ० १८-३१ । ३२

८—५ ....सम्यक्दृष्टिः ।

प्रवृत्ति च निवृत्ति च, कार्याकार्ये भयाभये ।
बन्धमोक्षं च या वेत्ति, बुद्धिः सा पार्थ ! सात्विकी ॥

गीता अ० १८-३०

८—१० देशाराधक... .. .. ।

तत्थणं जे से पढमे परिस जाए सेणं पुरिसे सीलवं असुयवं उवरए, अविण्णयधम्मे, एसणं गोयमा ! मए पुरिसे देसाराहए पण्णत्ते—देसाराहए तिस्तोकमंशं मोक्षमार्गस्याराधयतीत्यर्थः । सम्यग्बोधरहितत्वात् क्रियापरत्वात् ।

भगवती श० ८ उ १०

८—२६ सुख.....शरीरम् ।

आधारो देहो च्चिअ, जं सुहदुक्खोवलद्धीणं ।

विशेषावश्यक भाष्य गा० २००३

८—३५ (क) आयुर्वर्जं……… ।

केवलिसमुद्घातः सदसद्वेद्यं शुभाशुभनामोच्चनीचैः गोत्रकर्माश्रयः ।

प्रज्ञापनावृत्ति पद ३६

८—३५ (ख) तत्र च केवली…… ।

दण्डं प्रथमे समये, कपाटमथ चोत्तरे तथा समये ।
मन्थनमथ तृतीये, लोकव्यापी चतुर्थे तु ॥१॥
संहरति पञ्चमे, त्वन्तराणि मन्थानमथ पुनः षष्ठे ।
सप्तमके तु कपाटं, संहरति ततोऽष्टमे दण्डम् ॥ २ ॥

प्रज्ञापना पद १८ वृत्त्यन्तर्गत

९—३१ उत्पाद्………सत् ।

सद्द्रव्यं वा ।

भगवती श० ८ उ० ९ सत्पदद्वार

माउयाणुओगे (उपन्ने वा विगए वा धुवे वा) ।

स्थानांग स्था० १०

(ख) विशेषव्याख्यानात्मक टिप्पण (संस्कृत)

१—३ गुणपर्यायाश्रयो द्रव्यम्।

गुणपर्याययोर्भाजनं कालत्रये एकरूपं द्रव्यं स्वजात्या निजत्वेन एकस्वरूपं भवति। परं पर्यायवत् न परावृत्तिं लभते तद् द्रव्यमुच्यते। यथा—ज्ञानादिगुणपर्यायभाजनं जीवद्रव्यम्। रूपादिगुणपर्यायभाजनं पुद्‌गलद्रव्यम्। सर्वरक्तत्वादिघटत्वादिगुणपर्यायभाजनं मृद्‌द्रव्यम्।

द्रव्यानुयोगतर्कणा अ० २ पृ० ११

१—५ जीवपुद्‌गलानां……………।

ननु यदि जीवपुद्‌गलेभ्य एव गतिस्थिती भवतस्तदा कृतं धर्माधर्माभ्यां तत्तत्कार्यस्यान्यथासिद्धेः इति चेत्? तत्र, जीवपुद्‌गलेभ्यः परिणामिकारणेभ्यो गतिस्थित्योरुत्पादेऽपि ज्ञानोत्पत्तौ चक्षुरादेरिव ताभ्यां सहकारितया धर्माधर्मास्तिकाययोरप्यपेक्षणात्। न च क्षिति-जल-तेजसां तत्र सहकारित्वं वाच्यम्, क्षित्याद्यभावेऽपि वियति पक्षिणां पवनोद्‌भूतरुतादीनां च गतिस्थित्योरुपलम्भात्। ननु वियति स्थूलक्षित्याद्यभावेऽपि सूक्ष्मक्षित्यादिसम्भवात् तदपेक्षयैव तत्र पक्ष्यादीनां गतिस्थिती भविष्यत इति चेत्? न, एवं तर्हि सूक्ष्मक्षित्यादीनां तत्र गतिस्थित्योरभावप्रसङ्गः, तदीयगतिस्थित्योस्तत्रापेक्षाकारणान्तराभावात्, अतएव न वायोरप्यपेक्षा-

कारणता, तस्याप्यपेक्षाकारणान्तराभावेन गतिस्थित्योरभावप्रसङ्गात्, तस्माद् ययोर्न गत्वा स्थितिः स्थित्वा च न गतिस्तन्निमित्ते जीवपुद्गलानां गतिस्थिती, न च धर्माधर्मास्तिकायाभ्यामन्यस्तादृशः क्षित्यादिषु कश्चिदप्यस्ति। ननूक्तस्वरूपाभावात् क्षित्यादीनां मा भूत् कारणत्वम्, तद्योगाच्चाकाशस्य तद् भविष्यति इति चेत् न, लोकालोकविभागाभावप्रसंगात्, यत्र हि जीवपुद्गलानां गतिस्थिती स्तः स लोक इतरस्तु अलोक इति लोकालोकव्यवस्था, आकाशनिमित्तत्वे तु गतिस्थित्योरलोकेऽपि तद्भावप्रसङ्गेन लोकत्वप्राप्तचाऽलोकवार्ताप्युच्छिद्येत अतएव पुण्यपापयोरपि न तदपेक्षाकारणत्वम्, स्वदेहव्यापकात्मगतत्वेन नियतदेशस्थयोरपि पुण्यपापयोः पुद्गलानां गतिस्थितिकारणत्वेऽसम्बद्धत्वाविशेषात्, तन्महिम्नैव तेषां लोक इवालोकेऽपि गतिस्थितिप्रसङ्गात्, तथा चालोकस्यापि लोकत्वमापद्येत, मुक्तात्मनां च पुण्यपापभावेन इतः कर्मक्षयेण मुक्तौ गच्छतां गतेस्तत्र स्थितेश्चाभावप्रसङ्गात्, नाप्यालोकतमसोस्तदपेक्षाकारणत्वम्, अह्नि तमोऽभावेऽपि रजन्यां चालोकाभावेऽपि गतिस्थितिदर्शनात्, न च यदभावेपि यद् भवति तद् तस्य कार्यं नाम, तस्मात् क्षित्यादीनामपेक्षाकारणत्वाभावाद् व्यापकयोर्धर्माधर्मास्तिकाययोरेव जीवपुद्गलगतिस्थिती प्रति अपेक्षाकारणत्वमिति स्थितम्। न चैव सति सर्वदा जीवादीनां गतिस्थितिप्रसङ्ग इति वाच्यं सदा सान्निध्येऽप्येतयोः स्वयं गतिस्थितिपरिणतानामेव जीवादीनां गतिस्थित्युपष्टम्भकत्वात्, तथा च प्रयोगः जीवपुद्गलानां गतिसाधारणबाह्यनिमित्तापेक्षा, गतित्वात्, एकसरोजलाश्रितानां प्रभूतमत्स्यादीनां गतिवत्।

पंचलिंगी टीका पत्र ९१

१—८ अपरिमितस्याकाशस्य··· ········ ।

आकाशथिग्गलं लोकः। स हि महतो बहिराकाशस्य विनत-पटस्य थिग्गलमिव प्रतिभाति ।

प्रज्ञापना वृत्ति १५-१

१—१२ महास्कन्ध············ ।

योऽप्यचित्तमहास्कन्धः, समुद्घातोऽस्त्यजावजः ।
अष्टसामयिकः सोऽपि, ज्ञेयः सप्तमवत्सदा ॥
पुद्गलानां परीणामा-द्विश्रसोत्यात्स जायते ।
अष्टभिः समयैर्जात-समाप्तो जिनसत्कथत् ॥

लोकप्रकाश ३-२७७।२७८

१—१४ कारणमेव··········· ।

तदन्त्यमित्यादि सूक्ष्मो नित्यश्च परमाणुर्भवति सर्वेभ्यः पुद्गलेभ्योऽतिसूक्ष्म इत्यर्थः, पर्यायार्थतयाऽनित्यत्वेऽपि द्रव्यार्थतया तु नित्यः, पुनः कीदृशः परमाणुः, एकरसवर्णगन्धः—एक एव वर्णो-गन्धोरसश्च परमाणौ यस्मिन् स, पुनः कीदृशः, द्विस्पर्शः—द्वौ स्पर्शौ यस्मिन् स, शीतोष्णस्निग्धरूक्षाख्यानां चतुर्णां स्पर्शानां मध्यात् अविरुद्धस्पर्शद्वयोपेत इत्यर्थः, पुनः कीदृशः परमाणुः, कार्य-लिङ्गः—कार्यं घटपटादिवस्तुजातं तल्लिङ्गंज्ञापकं यस्य स, कथ-मित्याह—यतः तत् परमाण्वाख्यं सर्वेषां पदार्थानामन्त्यं कारणं वर्तते । अयमत्र भावार्थः—सर्वेऽपि द्विप्रदेशादयः स्कन्धाः तथा संख्यातप्रदेशाः असंख्यातप्रदेशा अनन्तप्रदेशाश्च । ये स्कन्धास्तेषां सर्वेषां पदार्थानामन्त्यं कारणं परमाणुरस्तीत्यर्थः ।

१—३१ समयक्षेत्र............।

'मनुष्योत्कर्षतः समयक्षेत्रात्समयप्रधानं क्षेत्रं मयूरव्यंसकादित्वान् मध्यपदलोपी समासः यस्मिन् अर्घ-तृतीय-द्वीपप्रमाणे सूर्यादिक्रिया-व्यंग्यः समयोनाम' कालद्रव्यमस्ति तत्समयक्षेत्रं मानुषक्षेत्रमिति भावः।

प्रज्ञापना वृत्ति पद २१

२—४ साकारोऽनाकारश्च।

सचेतने अचेतने वा वस्तुनि उपयुञ्जान आत्मा यदा सपर्यायमेव वस्तु परिच्छिनत्ति तदा स उपयोगः साकार उच्यते इति। तथा न विद्यते तथोक्तरूप आकारो यत्र सोऽनाकारः स चासावुपयोग-श्चानाकारोपयोगः। यत्तु वस्तुनः सामान्यरूपतया परिच्छेदः सोऽनाकारोपयोगः स्कन्धावारोपयोगवदित्यर्थः।

प्रज्ञापना वृत्ति प० २८

जं सामण्णग्गहणं, दंसणमेयं विसेसियं णाणं।

विशेषावश्यकभाष्य

२—१० ईहा.........।

अवग्रहादुत्तरकालमवायात्पूर्वं सद्भूतार्थविशेषोपादानाभिमुखो-ऽसद्भूतार्थविशेषपरित्यागाभिमुखः प्रायोऽत्र मधुरत्वादयः शंखादि-शब्दधर्मा दृश्यन्ते न कर्कशनिष्ठुरतादयः शार्ङ्गादिशब्दधर्मा इत्येवं-रूपो मतिविशेष ईहा।

प्रज्ञापना वृत्ति १५-२

२—१८ विशुद्धि.........।

(१) विशुद्धिकृतो भेदो यथा—

मनःपर्यायः अवधिज्ञानापेक्षया मनोद्रव्याणि विशुद्धतराणि जानीते।

(२) क्षेत्रकृतो भेदो यथा—

अवधिः उत्कर्षतः पूर्णेऽपि लोके जानीते, मनःपर्यायः मानुषक्षेत्रे एव।

(३) स्वामिकृतो भेदो यथा—

अवधिः गतिचतुष्टयेऽपि भवति, मनःपर्यायः संयतानामेव।

(४) विषयकृतो भेदो यथा—

अवधिः समस्तरूपिद्रव्याणि जानीते, मनःपर्यायः केवलं मनो-द्रव्याण्येव।

२—२० अज्ञान.........

कुत्सितं ज्ञानमज्ञानं, कुत्सार्थस्य नञोऽन्वयात्।
कुत्सितत्वं तु मिथ्यात्व-योगात् तन्त्रिविधं पुनः॥
मतिज्ञानश्रुतज्ञाने, एव मिथ्यात्वयोगतः।
अज्ञानसंज्ञां भजतो, नीचसंगादिवोत्तमः॥
भंगा विकल्पा विरुद्धाः, स्युस्तेऽत्रेति विभंगकम्।
विरूपो वावबोधभंगो, भेदोऽयं तद्विभंगकम्॥

लोकप्रकाश ३-८६९। ८७१। ८७२

२—२२ दर्शन.........।

जं सामन्नग्गहणं, भावाणं नेय कट्टु आगारं।
अविसेसिऊण अत्थे, दंसण मिइ वुच्चए समए॥

विशेषावश्यकभाष्य

२—२३ मनः.............न दर्शनम्।

अथ मनःपर्यायदर्शनमपि कस्मान्न भवति येन पञ्चमोऽनाकारो-पयोगो न भवतीति चेदुच्यते मनःपर्यायविषयं हि ज्ञानं मनसा पर्यायानेव विविक्तान् गृह्णन् क्वचिदुपजायते, पर्यायाश्च विशेषा-

विशेषालम्बनं च ज्ञानं ज्ञानमेव न दर्शनमिति मनःपर्यायदर्शनाभाव-स्तदभावाच्च पञ्चमानाकारोपयोगासम्भव इति।

प्रज्ञापना वृत्ति प० २८

२—२८ लब्धि............उपयोगः।

लब्धिर्ज्ञानदर्शनावरणीयक्षयोपशमरूपा यत् सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रतिव्याप्रियते तन्निमित्त आत्मनो मनःसाचिव्या-दर्थग्रहणं प्रति व्यापार उपयोगः।

आचाराङ्ग वृत्ति

२—३० ....भावमनः।

मणदव्वालंबणो जीवस्स मणणवावारो भावमणो भण्णइ।

नन्द्यध्ययन चूर्णि

द्रव्यमनोवष्टम्भेन जीवस्य यो मनःपरिणामः स भावमनः।

प्रज्ञापना वृत्ति १५-२

२—३५ घातिकर्मणः............क्षयोपशमः।

विवक्षितज्ञानादिगुणविघातकस्य कर्मण उदयप्राप्तस्य क्षयः—सर्वथापगमः अनुदीर्णस्य तु तस्यैवोपशमो विपाकत उदयाभाव इत्यर्थः, ततश्च क्षयोपलक्षित उपशमः क्षयोपशमः, ननु चौप-शमिकेऽपि यदुदयप्राप्तं तत्सर्वथा क्षीणं शेषं तु न क्षीणं नाप्युदय-प्राप्तमतस्तस्योपशम उच्यते इत्यनयोः कः प्रतिविशेषः? क्षयोपश-मावस्थे कर्मणि विपाकत एव उदयो नास्ति, प्रदेशतस्त्वस्त्येव, उपशान्तावस्थायां तु प्रदेशतोऽपि नास्त्युदय इत्येतावता विशेषः।

अनुयोगद्वार सू० १२६

३—३ संसारिणस्त्रस............।

उष्णाद्यभितापेऽपि तत्स्थानपरिहारासमर्थाः सन्तस्तिष्ठन्तीत्येवं-

शीलाः स्थावराः। त्रसन्ति अभिसन्धिपूर्वकमनभिसन्धिपूर्वकं वा ऊर्ध्वमधस्तिर्यक् चलन्तीति त्रसाः। 'परिस्पष्टसुखदुखेच्छाद्वेषादि-लिङ्गास्त्रसनामकर्मोदयात् स्थावरा।"

तत्त्वार्थवृहद्वृत्ति पत्र १५८

३—६ समनस्का..............।

दीर्घकालिक्युपदेशेन संज्ञी, हेतुवादोपदेशेन संज्ञी, दृष्टिवादो-पदेशेन संज्ञी। येषां शब्दरूपरसगन्धस्पर्शातीतांऽनागतभावविषयः स्पष्टतर उपयोगो भवति, यश्च ईहापोहादिकरणतः स्पष्टतर उप-योगः, स दीर्घकालिक्युपदेशेन संज्ञी। "जेसिं पवित्तिनिवित्ति, इट्ठाणिट्ठेसु होइ विसए सु। तेहेउवाउ सन्नी, वेहम्मेण यडो नायं।" सम्यग्दृष्टयस्ते दृष्टिवादोपदेशेन सञ्जिनः, शेषाः सर्वेऽपि मिथ्या-दृष्टयोऽसंज्ञिनः।

वृहत्कल्प भाष्य टीका

३—३० (क) सम्मूर्च्छन..............।

त्रिषु लोकेषूर्ध्वमधस्तिर्यक् च देहस्य समन्ततो मूर्च्छनम्—अव-यवप्रकल्पनम्।

तत्त्वार्थराजवार्तिक पृ० ९८

३—३० (ख) गर्भ..............।

यत्र शुक्रशोणितयोर्गरणं—मिश्रणं भवति स गर्भः।

तत्त्वार्थराजवार्तिक पृ० ९८

३—३१ पोतजानां..............।

पोतं वस्त्रं तद्वज्जाता, पोतादिव वा वोहित्याज्जाताः।

स्थानांग टीका स्था० ८

४—२ असत् क्रिया ....।

...पापं...अशुद्धे कर्मणि, तत्कारणत्वाद् हिंसादिके कर्मणि।

पञ्चाशक ३ विव०

४—५ कथञ्चिद् मूर्तत्वस्वीकारात्.........।

"जीवेणं भंते ! पोग्गली पोग्गले ? जीवे पोग्गलीवि पोग्गलेवि।" पुद्गलाः श्रोत्रादिरूपा विद्यन्ते यस्यासौ पुद्गली। पुद्गल इति संज्ञा जीवस्य ततस्तद्योगात् पुद्गल इति।

भगवती श० ८ उ० १०

४—८ ....वेदनीयम्

वेद्यते आह्लादादिरूपेण यदनुभूयते तद् वेदनीयम्। यद्यपि च सर्वं कर्म वेद्यते तथापि पङ्कजादि शब्दवद् वेदनीयशब्दस्य रूढिविषयत्वात् सातासातरूपमेव कर्म वेदनीयमित्युच्यते न शेषमिति।

प्रज्ञापना वृत्ति पद २३

४—२५ (क) अनन्तानुबन्धी............।

अनंतान्यनुबध्नन्ति, यतो जन्मानि भूतये।
ततोऽनन्तानुबन्धाख्या, क्रोधाद्येषु नियोजिता॥

प्रज्ञापना वृत्ति पद २३

४—२५ (ख) संज्वलन............।

संज्वलयति यतिं यत्, संविग्नं सर्वपापविरतमपि।
तस्मात् संज्वलना इ-त्यप्रशमकरा निरुच्यंते।

अन्यत्राप्युक्तम्—

शब्दादीन्विषयान् प्राप्य, संज्वलयंति यतो मुहुः।
ततः संज्वलनाह्वानं, चतुर्थानामिहोच्यते॥

प्रज्ञापना वृत्ति पद २३

५—१४ द्विधापीयं..........मिथ्यात्विनाश्च ।

क्रियावादिनामक्रियावादिनां च मिथ्यादृशां सकामनिर्जरा भवति, न वा ? यदि सकामनिर्जरा, तर्हि ग्रन्थाक्षराणि प्रसाद्यानीति प्रश्ने, उत्तरम्—क्रियावादिनामक्रियावादिनां च केषाञ्चित् सकाम-निर्जरापि भवतीत्यवसीयते, यतोऽकामनिर्जराणामुत्कर्षतो व्यन्तरेष्वेव, बालतपस्विनां चरकादीनां तु ब्रह्मलोकं यावदुपपातः प्रथमोपाङ्गादावुक्तोऽस्तीति, तदनुसारेण पूर्वोक्तानां सकामनिर्जरेति तत्त्वम् ।

सेन प्रश्नोत्तर ३ उल्ला०

५—२५ बहुमानकरणं...... ......।

बहुमानो नाम आन्तरो भावप्रतिबन्धः ।

दशवैकालिक अ० ३

अन्तरङ्गप्रीतिविशेषे यथा—

धन्यास्ते वन्दनीयास्ते, तैस्त्रैलोक्यं पवित्रितम् ।
यैरेष भुवनक्लेशि - काममल्लो निराकृतः ।।

पञ्चाशक विव० १

आन्तरङ्गभावप्रतिबन्धे ।

दशवैकालिक अ०९ उ० १

गुणानुरागे ।

ज्ञाता श्रु० १ अ० १

७—१५ (क) आधाकर्मादयः...........।

१ आधाकर्म, २ उद्देशिकम्, ३ पूतिकर्म्म, ४ मिश्रजातम्, ५ स्थापना, ६ प्राभृतिका, ७ प्रादुष्करणम्, ८ क्रीतम्,

९ प्रामित्यकम्, १० परिवर्तितम्, ११ अभ्याहृतम् १२ उद्भिन्नम्, १३ मालापहृतम्, १४ आच्छेद्यम्, १५ अनिसृष्टम्, १६ अध्यव-पूरकः।

७—१५ (ख) धात्र्यादयः…… ……।

१७ धात्रीपिण्डः, १८ दूतीपिण्डः, १९ निमित्तपिण्डः, २० आजीवपिण्डः, २१ वनीपकपिण्डः, २२ चिकित्सापिण्डः २३ क्रोधपिण्डः, २४ मानपिण्डः, २५ मायापिण्डः, २६ लोभ-पिण्डः, २७ पूर्वपश्चात्संस्तवपिण्डः, २८ विद्याप्रयोगः, २९ मन्त्र-प्रयोगः, ३० चूर्णप्रयोगः, ३१ योगप्रयोगः, ३२ मूलकर्मप्रयोगः।

७—१५ (ग) शङ्कितादयः…………।

३३ शङ्कितम्, ३४ म्रक्षितम्, ३५ निक्षिप्तम्, ३६ पिहितम्, ३७ संहृतम्, ३८ दातृकर्म, ३९ उन्मिश्रम्, ४० अपरिणतम्, ४१ अन्नादिलिप्तम्, ४२ छर्दितम्।

७—२६ ग्रामनगरराष्ट्र…………लोकधर्मः।

ग्रामाः—जनपदाश्रयास्तेषां तेषु वा धर्मः—समाचारो व्यव-स्थेति ग्रामधर्मः स च प्रतिग्रामं भिन्न इति, अथवा ग्रामः—इन्द्रिय-ग्रामो रूढेस्तद्धर्मोविषयाभिलाषः १, नगरधर्मः—नगराचारःसोऽपि प्रतिनगरं प्रायो भिन्न एव २, राष्ट्रधर्मो—देशाचारः ३, पाखण्ड-धर्म—पाखण्डिनामाचारः ४, कुलधर्मः—उग्रादिकुलाचारः, अथवा कुलं चान्द्रादिकमार्हतानां गच्छसमूहात्मकं तस्य धर्मः समाचारी ५, गणधर्मो—मल्लादिगणव्यवस्था, जैनानां वा कुलसमुदायो गणः-कोटिकादिस्तद्धर्मः—तत्समाचारी ६, संघधर्मो—गोष्ठीसमाचारः आर्हतानां वा गणसमुदायरूपश्चतुर्वर्णो वा संघस्तद्धर्मस्तत्समा-चारः ७, श्रुतमेव आचारादिकं दुर्गतिप्रपतज्जीवधारणात् धर्मः

श्रुतधर्मः ८, चयरिक्तीकरणात् चारित्रं तदेव धर्मः चारित्रधर्मः ९, अस्तयः—प्रदेशास्तेषां कायो—राशिरस्तिकायः स एव धर्मो—गतिपर्यायो जीवपुद्गलयोर्धारणादित्यस्तिकायधर्मः १० ।

स्थानांग वृत्ति स्था० १०

७—३१ ....आज्ञा ।

आज्ञाप्यते इत्याज्ञा—हिताहितप्राप्तिपरिहाररूपतया सर्वज्ञोपदेशः ।

आचाराङ्ग १-२-२-७३

८—२ आत्मनः............ ।

कम्म विसोहिमग्गणं पडुच्च चउद्दस गुणट्ठाणा पण्णत्ता ।

समवायाङ्ग १४

८—२ (क) सयोगी............ ।

योगा मनोवाक्कायव्यापाराः, योगा एषां सन्तीति योगिनो, मनोवाक्कायाः सहयोगिनो यस्य येन वा स सयोगी ।

प्रज्ञापना वृत्ति पद १८

८—२ (ख) मिथ्या ....गुणस्थानम् ।

मिथ्या विपरीता दृष्टिर्यस्य स मिथ्यादृष्टिः—मिच्छादिट्ठिगुणट्ठाणा । मिथ्या विपर्यस्ता दृष्टिरर्हत्प्रणीतजीवाजीवादिवस्तुप्रतिपत्तिर्यस्य भक्षितहृत्पूरपुरुषस्य सिते पीतप्रतिपत्तिवत् स मिथ्यादृष्टिस्तस्य गुणस्थानं ज्ञानादिगुणानामविशुद्धिप्रकर्षविशुद्ध्यपकर्षकृतः स्वरूपविशेषो मिथ्यादृष्टिगुणस्थानम् । ननु यदि मिथ्यादृष्टिस्ततः कथं तस्य गुणस्थानसंभवः, गुणा हि ज्ञानादिरूपास्तत्कथं ते दृष्टौ विपर्यस्तायां भवेयुरिति ? उच्यते इह यद्यपि सर्वथाऽतिप्रबलमिथ्यात्वमोहनीयोदयादर्हत्प्रणीतजीवाजीवादिवस्तुप्रतिपत्ति-

रूपा दृष्टिरसुमतो विपर्यस्ता भवति तथापि काचिन्मनुष्यपश्वादि-प्रतिपत्तिरविपर्यस्ता, ततो निगोदावस्थायामपि तथाभूता व्यक्त-स्पर्शमात्रप्रतिपत्तिरविपर्यस्ता भवति अन्यथा अजीवत्वप्रसङ्गात्, यदाह आगमः—'सव्व जीवाणं पिअणं अक्खरस्स अणंतभागो निच्चुग्घाडिओ चिट्ठइ, जइ पुण सोवि आवरिज्जा, तोणं जीवो अजीवत्तणं पाविज्जा, इत्यादि। तथाहि समुन्नतातिबहलजीमूत-पटलेन दिनकररजनीकरकरनिकरतिरस्कारेऽपि नैकान्तेन तत्प्रभा-नाशः संपद्यते, प्रतिप्राणिप्रसिद्धदिनरजनीविभागाभावप्रसङ्गात्। एवमिहापि प्रबलमिथ्यात्वोदये काचिद विपर्यस्तापि दृष्टिर्भवतीति तदपेक्षया मिथ्यादृष्टेरपि गुणस्थानसंभवः। यद्येवं ततः कथमसौ मिथ्यादृष्टिरेव मनुष्यपश्वादिप्रतिपत्त्यपेक्षयाऽन्ततो निगोदावस्था-यामपि तथाभूता व्यक्तस्पर्शमात्रप्रतिपत्त्येक्षया वा सम्यग्दृष्टित्वादपि नैष दोषः, यतो भगवदर्हत्प्रणीतं सकलमपि द्वादशाङ्गार्थमभिरोचय-मानोऽपि यदि तद् गदितमेकमप्यक्षरं न रोचयति तदानीमप्येष मिथ्यादृष्टिरेवोच्यते तस्य भगवति सर्वज्ञे प्रत्ययनाशात्। "पयम-क्खरंपि एक्कं, पि जो न रोएइ सुत्तनिद्दिट्ठं। सेसं रोयंतो विहु, मिच्छा दिट्ठि जमालिव्व ॥१॥" किं पुनर्भगवदभिहितसकलजीवा-जीवादिवस्तुतत्त्वप्रतिपत्तिविकलः।

कर्मग्रन्थ टीका २

८—१४ (क) पूर्वपर्यायच्छेदेन.........।

यत्र हिंसादिभेदेन, त्यागः सावद्यकर्मणः।

व्रतलोपे विशुद्धिर्वा, छेदोपस्थापनं हि तत् ॥

तत्त्वार्थसार संवरवर्णनाधिकार श्लो० ४६

पूर्वपर्यायस्य छेदनोपस्थापनं महाव्रतेषु यत्र तच्छेदोपस्थानम् ।

अनुयोगद्वार सू० १४४

८—१४ (ख) परिहारेण............।

परिहारस्तपोविशेपस्तेन विशुद्धः अथवा अनेषणीयादेः परित्यागो विशेषण शुद्धः यत्र तत्परिहारविशुद्धम् ।

अनुयोगद्वार वृत्ति सू० १४४

८—१४ (ग) सूक्ष्मसम्परायः............।

संपरैति—पर्यटति संसारमनेनेति सम्परायः—क्रोधादिकषायः, लोभांशमात्रावशेपतया सूक्ष्मः सम्परायो यत्र तत्सूक्ष्मसम्परायम् ।

अनुयोगद्वारवृत्ति सू० १४४

८—२८ (क)............तैजसम् ।

रसाद्याहारपाकजननं तेजोनिसर्गलब्धिनिबन्धनं च तेजसो विकारस्तैजसम् ।

अनुयोगद्वार वृत्ति सू० १४२

८—२८ (ख)............कार्मणम् ।

अष्टविधकर्मसमुदायनिष्पन्नमौदारिकादिशरीरनिबन्धनं च भवान्तरानुयायि कर्मणो विकारः कर्मैव वा कार्मणम् ।

अनुयोगद्वार वृत्ति सू० १४२

८—३० द्विविधा च सा............।

वक्रा गतिश्चतुर्धा स्याद्, वक्रैरेकादिभिर्युता ।
तत्राद्या द्विक्षणैकैक—क्षणवृद्धया क्रमात्पराः ॥

तथाहि—

यदोर्ध्वलोक पूर्वस्या, अधः श्रयति पश्चिमाम् ।
एकवक्रा द्विसमया, ज्ञेया वक्रा गतिस्तदा ॥

समश्रेणिगतित्वेन, जन्तुरेकेन यात्यधः।
द्वितीयसमये _ तिर्यग्, उत्पत्तिदेशमाश्रयेत् ॥
पूर्वदक्षिणोर्ध्वदेशा — दधश्चेदपरोत्तराम्।
व्रजेत्तदा द्विकुटिला, गतिस्त्रिसमयात्मिका ॥
एकेनाधस्समश्रेण्या, तिर्यगन्येन पश्चिमाम्।
तिर्यगेव तृतीयेन, वायव्यां दिशि याति सः ॥
त्रसानामेतदन्तैव, वक्रा स्यान्नाधिका पुनः।
स्थावराणां चतुः.........समयान्तापि सा भवेत् ॥
(तत्र चतुः समया त्वेवम्) त्रसनाड्या बहिरधो, लोकस्य विदिशो दिशम्।
यात्येकेन द्वितीयेन, त्रसनाड्यन्तरे विशेत् ॥
ऊर्ध्वं याति तृतीयेन, चतुर्थे समये पुनः।
त्रसनाड्या विनिर्गत्य, दिश्यं स्वस्थानमाश्रयेत् ॥
दिशो विदिशि याने तु, नाडीमाद्ये द्वितीयके।
ऊर्ध्वं चाधस्तृतीये तु, बहिर्विदिशि तुर्यके ॥

लोकप्रकाश सर्ग ३—१०९७—११०४

८—३४ वेदनादिभिः............।

वेदनादिभिः तथाहि आत्मा वेदनादिसमुद्घातगतो भवति तदा वेदनाद्यनुभवज्ञानपरिणत एव भवति नान्यज्ञानपरिणतः, प्राबल्येन कथं घात इति चेदुच्यते—इह वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मप्रदेशान् कालान्तरानुभवयोग्यानुदीरणाकरणेना-कृष्योदयावलिकायां प्रक्षिप्यानुभूय च निर्जरयति आत्मप्रदेशैः सह सश्लिष्टान् सातयतीति भावः।

प्रज्ञापना वृत्ति पद ३६

विशेष-व्याख्यानात्मक टिप्पण (हिन्दी)

२—१३ तच्च............चतुर्दशविधम्।

श्रुत के १४ भेद—

१ अक्षरश्रुत—अक्षरों द्वारा कहने योग्य भावकी प्ररूपणा करना।

२ अनक्षरश्रुत—मुंह, भौं, अंगुली आदिके विकार या संकेतसे भाव जताना।

इन दोनोंमें साधनको साध्य माना गया है। अक्षर और अनक्षर दोनों श्रुतज्ञानके साधन हैं। इनके द्वारा श्रोता, पाठक और द्रष्टा; वक्ता, लेखक और संकेतकके भावोंको जानता है।

३ संज्ञिश्रुत—मनवाले प्राणीका श्रुत।

४ असंज्ञिश्रुत—विना मनवाले प्राणीका श्रुत।

ये दोनों भेद ज्ञानके अधिकारीके भेदसे किये गये हैं।

५—सम्यक्श्रुत—सम्यग्दृष्टिका श्रुत, मोक्ष-साधनामें सहायक श्रुत।

६ मिथ्याश्रुत—मिथ्यादृष्टिका श्रुत, मोक्ष-साधनामें बाधक श्रुत।

ये दोनों भेद प्ररूपक और ग्राहककी अपेक्षासे हैं।

७ सादिश्रुत—आदि सहित।

८ अनादिश्रुत—आदि रहित।

९ सपर्यवसित श्रुत—अन्त सहित।

१० अपर्यवसित श्रुत—अन्त रहित।

शब्दात्मक रचनाकी अपेक्षा श्रुत सादि-सान्त होता है और सत्यके रूपमें या प्रवाहके रूपमें अनादि-अनन्त।

११ गमिक श्रुत—१२ वां अंग, दृष्टिवाद। इसमें आलापक पाठ—सरीखे पाठ होते हैं—'सेसं तहेव भाणियव्वं'—कुछ वर्णन चलता है और बताया जाता है—शेष उस पूर्वोक्त पाठकी तरह समझना चाहिए। इस प्रकार एक सूत्र-पाठका सम्बन्ध दूसरे सूत्र-पाठसे जुड़ा रहता है।

१२ अगमिक श्रुत—जिसमें पाठ सरीखे न हों।

१३ अंगप्रविष्ट श्रुत—गणधरोंके रचे हुए आगम—१२ अंग, जैसे—आचार, सूत्रकृत आदि-आदि।

१४ अनगप्रविष्ट श्रुत—गणधरोंके अतिरिक्त अन्य आचार्यों द्वारा रचे गये ग्रन्थ।

२—३४ केवलज्ञान··········।

१ केवल-ज्ञान—पूर्णज्ञान, अखण्डज्ञान, सब द्रव्य और सब पर्यायोंका ज्ञान। यह ज्ञानावरण-कर्मके क्षयसे प्रगट होता है।

२ केवल-दर्शन—पूर्ण-दर्शन। यह दर्शनावरण-कर्मके क्षयसे प्रगट होता है।

३ आत्मिक सुख—वेदनीय कर्मके क्षयसे होता है।

४ क्षायिक सम्यक्त्व—यह दर्शन-मोह-कर्मके क्षयसे होता है। इसके

अधिकारीको कभी भी मिथ्या-दर्शन नहीं होता। क्षायिक-चारित्र, चारित्र-मोह-कर्मके क्षयसे होता है।

५ अटल अवगाहन—शाश्वत स्थैर्य्य—जन्म-मृत्युका अत्यन्त उच्छेद। यह आयुष्य-कर्मके क्षयसे होता है।

६ अमूर्तिकपन—रूपरहित—स्पर्श, रस, वर्ण और गन्ध रहित। यह नाम-कर्मके क्षयसे होता है। नाम-कर्मके उदयसे शरीर मिलता है। उसका क्षय होनेपर आत्मा अशरीरी बन जाता है।

७ अगुरुलघुपन—न छोटापन और न बड़ापन—ऐसी अवस्था। यह गोत्र कर्मके क्षयसे होता है।

८ लब्धि—बाधाका अभाव, आत्माका सामर्थ्य। यह अन्तराय कर्मके क्षयसे होता है।

३—३४ सचित्ताऽचित्त..........योनयः।

जीव-सम्बन्ध-विसम्बन्ध, स्पर्श तथा आकारकी अपेक्षा योनिके ९ भेद होते हैं।

१ सचित्त[1]—सजीव, जैसे—जीवित गायके शरीरमें कृमि पैदा होते हैं, वह सचित्त योनि है।

२ अचित्त—निर्जीव, जैसे—देव और नारकोंकी योनि अचित्त होती है।

३ सचित्त[2]-अचित्त—सजीव-निर्जीव, जैसे—गर्भज-मनुष्य और गर्भज

१—आत्मनश्चैतन्यस्य परिणामविशेषश्चित्तम् तेन सह वर्त्तन्ते इति सचित्ताः। तत्त्वार्थराजवार्तिक पृ० ९९

२—गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियाणाम्, गर्भव्युत्क्रान्तिकमनुष्याञ्च यत्रोत्पत्तिस्तत्र अचिता अपि शुक्रशोणितपुद्गलाः सन्तीति मिश्राः तेषां योनिः। प्रज्ञापना वृत्ति पद ९

तिर्यञ्चोंकी योनि मिश्र होती है। इनकी उत्पत्ति शुक्र और शोणितके सम्मिश्रणसे होती है। शुक्र और शोणितके जो पुद्गल आत्मसात् हो जाते हैं, वे सचित्त और जो आत्म प्रदेशोंसे सम्बद्ध नहीं होते, वे अचित्त कहलाते हैं। प्रकारान्तरमें यों भी माना जाता है कि शुक्र अचित्त और शोणित सचित्त है।

शेष सब जीवोंकी योनि तीनों प्रकारकी होती है।

४ शीत—जैसे—प्रथम नरकके नारकोंकी योनि शीत होती है।

५ उष्ण—जैसे—तेजस्कायके जीवोंकी योनि उष्ण होती है।

६ शीतोष्ण—जैसे—देव, गर्भज-तिर्यञ्च और गर्भज-मनुष्योंकी योनि शीतोष्ण होती है। पृथ्वीकाय, अप्काय, वायुकाय, वनस्पतिकाय, द्वीन्द्रिय, त्रीन्द्रिय, चतुरिन्द्रिय, सम्मूर्च्छिम तिर्यक् पञ्चेन्द्रिय और सम्मूर्च्छिम मनुष्योंकी योनि शीत, उष्ण और शीतोष्ण तीनों प्रकारकी होती है।

नारकोंकी योनि शीत या उष्ण होती है।

७ संवृत—ढकी हुई, जैसे—देव, नारक और एकेन्द्रिय जीवोंकी योनि संवृत होती है।

८ विवृत—जो प्रगट हो, जैसे—विकलेन्द्रिय, सम्मूर्च्छिम तिर्यञ्च पञ्चेन्द्रिय और सम्मूर्च्छिम मनुष्योंकी योनि विवृत होती है।

९ संवृत-विवृत—उभयरूप, जैसे—गर्भज-तिर्यञ्च पञ्चेन्द्रिय और गर्भज मनुष्योंकी योनि संवृत-विवृत होती है।

४—६ पञ्चनव············।

ज्ञानावरणीय ५

१ मतिज्ञानावणीय, २ श्रुतज्ञानावरणीय, ३ अवधिज्ञानावरणीय,

४ मनःपर्यायज्ञानावरणीय ५ केवलज्ञानावरणीय ।

दर्शनावरणीय ६

१ निद्रा २ निद्रानिद्रा ३ प्रचला ४ प्रचलाप्रचला ५ स्त्यानर्द्धि ६ चक्षुदर्शन ७ अचक्षुदर्शन ८ अवधिदर्शन ९ केवलदर्शन ।

वेदनीय २

१ सातवेदनीय २ असातवेदनीय

मोहनीय २८

